नमो॑ व꣡ पितरो॒ रसा॑य । [पित॑रो॒ नमो॑ वः।],

▼ Keith

Homage to your taste, O fathers;

▼ भट्टभास्कर-टीका

हे पितरः युष्मभ्यं नमः नमस्करोमि रसाय रसार्थं रसवान् भूयासमिति । 'पितरो नमो वः' इत्यादिकं षट्स्वप्यजुषज्यते ।

▼ विश्वास-प्रस्तुतिः

नमो॑ व꣡ पितर॒श् शुष्मा॑य *(पित॑रो॒ नमो॑ वः)*,,

▼ Keith

homage to your birth, O fathers;

▼ भट्टभास्कर-टीका

शुष्मो बलम् ।

▼ विश्वास-प्रस्तुतिः

नमो॑ व꣡ पितरो जी॒वाय । [पित॑रो॒ नमो॑ वः।],

▼ Keith

homage to your life, O fathers;

▼ भट्टभास्कर-टीका

जीवः प्राणः ।

▼ विश्वास-प्रस्तुतिः

नमो॑ वः पि॒तर॒स् स्व॒धायै॑ । [पित॑रो॒ नमो॑ वः।],,

▼ Keith

homage to your [5] custom, O fathers;

▼ भट्टभास्कर-टीका

स्वधा अन्नम् ।

▼ विश्वास-प्रस्तुतिः

नमो॑ वः पितरो म॒न्यवे॑ । [पित॑रो॒ नमो॑ वः।],,

▼ Keith

homage to your anger, O fathers;

▼ भट्टभास्कर-टीका

मन्युर्दीप्तिः, क्रोधो वा ।

▼ विश्वास-प्रस्तुतिः

नमो॑ वः पितरो घो॒राय॑ ,
पित॑रो॒ नमो॑ वः ।

▼ Keith

homage to your terrors, O fathers; O fathers, homage to you.

▼ भट्टभास्कर-टीका

घोरः क्रूरम् । एतयोः स्थाने प्राधान्यं प्रार्थ्यते । हे पितरः युष्मभ्यं नमः । फलमनपेक्ष्य सप्तमोयं नमस्कारः क्रियते । पुनर्वचनं फलनिरपेक्षया नमस्कारार्थम् । अन्य आहुः - पितृसंबन्धिभ्यो रसादिभ्यः प्रथमं षण्णमस्काराः, ततः पितृभ्य एव सप्तम इति ।

▼ विश्वास-प्रस्तुतिः

य ए॒तस्मिल्ँ॒ लो॒के स्थ यु॒ष्माँस्तेऽनु॑ ।

▼ Keith

Ye that are in that world, may they follow you;

▼ भट्टभास्कर-टीका

ये एतस्मिन् लोके पितरः स्थ । एतस्मिन्निति पितृलोकं व्यपदिशति । स्थेति सर्वपित्रभिप्रायेणोक्तम् । ते सर्वे युष्माननुसन्तु युष्मत्प्रधाना भवन्तु । 'हीने' इत्यनोः कर्मप्रवचनीयत्वम् । युष्मानिति पित्रादित्रयं व्यपदिशति ।

▼ विश्वास-प्रस्तुतिः

येंऽस्मिल्ँ॒ लो॒के मान् तेऽनु॑ ।

▼ Keith

ye that are in this world, may they follow me.

▼ भट्टभास्कर-टीका

अस्मिन् मनुष्यलोके मनुष्याः स्थ, ते सर्वे मामनु सन्तु मत्प्रधाना भवन्तु ।

▼ विश्वास-प्रस्तुतिः

य ए॒तस्मिल्ँ॒ लो॒के स्थ यू॒यन् तेषाव्ँ॒ वसिं॑ष्ठा भूयास्त ।

▼ Keith

Ye that are in that world, of them be ye the most fortunate;

▼ भट्टभास्कर-टीका

ये यूयमेतस्मिन् लोके स्थ तेषां पितृणां यूयं वसिष्ठाः वसुमत्तमा भूयास्त ।

▼ विश्वास-प्रस्तुतिः

येंऽस्मिल्ँ॒ लो॒कें ऽहन् तेषाव्ँ॒वसिं॑ष्ठो भूयासम् ।

▼ Keith

ye that are in this world, of these may I be the most fortunate.

▼ भट्टभास्कर-टीका

येऽस्मिन् लोके सन्ति मनुष्यास्तेषां मनुष्याणामहं वसिष्ठो वसुमत्तमो भूयासम् । वसुशब्दादिष्ठनि 'विन्मतोर्लुक्' इति लुक्, 'टेः' इति टिलोपः ॥

[[137]]

स्वा॒दु॒-षँ॒सदः॑ पि॒तरो॑ वयो॒-धाः
कृ॑च्छ्रे॒-श्रित॒ः शक्ती॑वन्तो गभी॒राः।
चि॒त्रसे॑ना॒ ऽइषु॑-बला॒ ऽअमृ॑ध्राः*(=अयोध्याः)*
स॒तो*(ऽधिक)*-वी॑रा ऽउ॒रवो॑ व्रात-सा॒हाः ॥४६ ॥

ब्राह्म॑णास॒ः पित॑र॒ः सोम्या॑सः
शि॒वे नो॒ द्यावा॑-पृथि॒वी ऽअ॑ने॒हसा॑।
पू॒षा नः॑ **पातु** दुरि॒ताद् ऋ॑ता-वृधो॒
रक्षा॒ माकि॑र् **नो ऽअ॒घशँ॑स ऽईशत** ॥४७ ॥

(इषोः पुच्छे) सु॒प॒र्णं व॑स्ते*(=आच्छादयति)*, मृ॒गो ऽअ॑स्या॒ दन्तो॒
(शल्ययोजने) गोभि॒ः सन्न॑द्धा, पतति॒ प्रसू॑ता।
यत्रा॒ नर॒ः सं च॒ वि च॒ द्रव॑न्ति॒
तत्रा॒स्माभ्य॒म् इष॑व॒ः शर्म॑ यँसन् ॥४८ ॥*(5)*

▼ विश्वास-प्रस्तुतिः

अष्टाव् अ॑ष्टाव॒न्येषु॒ धिष्णि॑ये॒षूप॑ दधाति ।
अ॒ष्टाश॑फा॒ꣳ प॒शव॒ꣳ, प॒शूने॒वाव॑ रुन्धे ।
षण्मा॑र्जा॒लीये॒ , षड्वा ऋ॒तवः॑ ।
ऋ॒तव॒× खलु॒ वै दे॒वाꣳ पि॒तरः॑ ।
ऋ॒तूने॒व दे॒वान्पि॒तॄन्प्री॑णाति ॥ [55]

▼ भट्टभास्कर-टीका

14अष्टाविति ॥ एकां याजुषीम् । सप्त च लोकंपृणाः ।
अन्येषु धिष्ण्येषु आग्नीध्रीयादिषु षडिति । एकां याजुषीं पञ्च लोकंपृणाः ।
ऋतव एव खलु पितृरूपेण वर्तन्ते । तस्माद् उभयान्प्रीणातीति ॥

इति पञ्चमे चतुर्थे एकादशोनुवाकः ॥

इत्य् उपस्थाय -
उपवीती - प्रदक्षिणीकृत्य प्रणम्योत्थाय,

आशीर्वचनम्②

आशीर्वचनम्

भोक्तारः -

▼ विश्वास-प्रस्तुतिः

(हे यजमान)
अ॒ग्निर् आयु॑ष्मा॒न् ,
स वन॒स्-पति॑भि॒र् आयु॑ष्मा॒न् ,
तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।

सोम॒ आयु॑ष्मा॒न् स ओष॑धीभिर् [आयु॑ष्मा॒न् तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

(हे यजमान) य॒ज्ञ [आयु॑ष्मा॒न्], स दक्षि॑णाभि॒र् आयु॑ष्मा॒न्, [तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

(हे यजमान) ब्रह्मायु॑ष्म॒त्, तद्ब्रा॑ह्म॒णैरायु॑ष्मत् , [तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

(हे यजमान) दे॒वा आयु॑ष्मन्तः।
ते॒॑ऽमृते॑न [+आयु॑ष्मन्तः] [तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

पि॒तर॒ आयु॑ष्मन्त॒स् ते स्व॒धयाऽऽयु॑ष्मन्त॒स्, तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।

▼ भट्टभास्कर-टीका

अग्निरायुष्मान् दीर्घायुः । स वनस्पतिभिरायुष्मान् तैर्हेतुभिस्तैर्वासह । तेनायुषा उभयेनायुषा त्वामायुष्मन्तं करोमि दीर्घायुषं करोमि । हे यजमान सोमादिषु 'आयुष्मान्तेन' इत्याद्यनुषज्यते । सोम ओषधीभिः, यज्ञो दक्षिणाभिः ब्रह्म ब्राह्मणैः, देवा अमृतेन, पितरस्स्वधया ॥

इति द्वितीये तृतीये दशमोनुवाकः ॥

इति आशीर्वचने कृते,
श्रीपाद-तीर्थं गृहीत्वा,

धन्यता②

दक्षिणाभिः सम्पूज्य,

[[138]]

▼ विश्वास-प्रस्तुतिः

धन्या वयं भवत्पाद-
रजः पूतम् इदं गृहम् ।
अनुग्रहश् च युष्माभिः
कृतोऽस्मासु दयालुभिः ॥

▼ विश्वास-प्रस्तुतिः

पत्र-शाकादि-दानेन
क्लेशिता यूयम् ईदृशाः ।
तत्-क्लेश-जातं चित्तेषु
विस्मृत्य क्षन्तुम् अर्हथ ॥

▼ विश्वास-प्रस्तुतिः

मन्त्र-हीनं क्रिया-हीनं
भक्तिहीनं द्विजोत्तमाः !
श्राद्धं सम्पूर्णतां यातु
प्रसादात् भवतां मम ॥

▼ विश्वास-प्रस्तुतिः

अद्य मे सफलं जन्म
भवत्-पादाब्ज-वन्दनात् ।
अद्य मे वंशजाः सर्वे
याता वोऽनुग्रहात् दिवम्

इत्युपचारान् उक्त्वा,
पादौ निपीड्य

वा॒जेवाजे ऽवत वाजिनो! नो
ध॒नेषु, विप्रा! अमृता! ऋत-ज्ञाः ।
अस्य॒ म॒ध्वः पिबत माद॒यध्वं
तृप्ता॒ यात पथि॒भिर् देव-या॒नैः ॥

इति प्रतिब्राह्मणम् उक्त्वा,

१. **प्राचीनावीती** - ‘उत्तिष्ठत पितृ-पितामह-प्रपितामहाः!'
२. **उपवीती** - ‘उत्तिष्ठत विश्वे देवाः!'
३. 'उत्तिष्ठ विष्णो!'

इति विसृज्य प्रणम्य,
प्रदक्षिणी-कृत्य आगच्छेत् ।

[[139]]

विसृष्टाश्च ब्राह्मणाः,

▼ विश्वास-प्रस्तुतिः

वा॒म॒दे॒वाय॒ नमो॒
ज्ये॒ष्ठाय॒ नमः॑
(श्रे॒ष्ठाय॒ नमो॒)
रु॒द्राय॒ नम॒ः
का॒लाय॒ *(~~कालाय॒~~)* नम॒ः
कल॑-विकरणाय॒ नमो॒
बल॑-विकरणाय॒ नमो॒
(बला॑य॒ नमो॒)
बल॑-प्रमथनाय॒ नम॒स्
सर्व॑-भूत-दमनाय॒ नमो॒
म॒नोन्म॑नाय॒ *(←स्वरः?? व्युत्पत्तिः?)* नमः॑ । (59)

▼ स्वरोहः

तत्पुरुषग्रहणे -

वा॒म॒दे॒वाय॒ नमो॒ ज्ये॒ष्ठाय॒ नम॒ः श्रे॒ष्ठा॑य॒ नमो॒ रु॒द्राय॒ नमः॑ का॒लाय॒ नमः॑ कलवि॒कर॑णाय॒ नमो॒ बलवि॒कर॑णाय॒ नमो॒ बला॑य॒ नमो॒ बलप्र॒मथ॑नाय॒ नमः॑ सर्वभू॒त॒दम॑नाय॒ नमः॑।

▼ मानसतरङ्गिणीकृत् - टिप्पनी

The vAmadeva mantra of the pa~nchabrahma-s is the mantra of the 11 rudra-s. It names a total of 11 rudra-s, an ancient number associated with the rudra-s. The shatapatha brAhmaNa of the shuklayajurveda gives a different list of rudra-s, 9 in number. Notably, this number is important in the later tAntrika tradition (e.g., navAtman bhairava and the navAtman mantra of the early Urdhvasrotas; 9^2 also underlies the structure of the vyomavyApin mantra).

9 female forms of these rudra-s are the 9 shakti-s of the central maNDala of shiva in both the dakShiNasrotas and Urdhvasrotas. They are arranged as an ogdoad in an 8-petalled lotus around sadAshiva or svachChanda-bhairava, with manonmanI as the shakti in the center alongside shiva.*(4)*

However, some texts, like the saiddhAntika texts, kiraNa and parAkhya, list 9 rudra-s.
These are extracted from the original 11 of the vAmadeva mantra parallel to the 9 shakti-s of rudra:

1. vAmadeva; 2. jyeShTha; 3. rudra; 4. kAla; 5. kalavikaraNa (kalAkShepa); 6. balavikaraNa (balakShepa); 7. balapramathana; 8. sarvabhutasdamana; 9. manonmana

> The corresponding Śaktis extracted from this mantra include all but shreSTha and bala, suggesting that the drAviDapATha could be the older one. - GA

The parAkhya tantra, which lists slightly different variants (in brackets) of some of these rudra-s mentions explicitly that they reside with the respective shakti-s.

The sAdhaka of the nine-bIja navAtman invokes the 9 rudra-s on padmapITha-s blossoming in the chidabdhiH.

But analysis of the pa~nchabrahma-s from various sources shows that the vAmadeva yajuSh is polymorphic across different traditions:

The 9-name version:

We believe this variant goes back to the late kR^iShNa-yajurveda itself. Although the bodhAyana-s follow the taittirIya shruti, they have their own mantrapATha and prayoga with variants. They have a rite known as the pa~nchabrahma-nyAsa, which gives the vAmadeva mantra with 9 names:

> vAmadevAya namo jyeShThAya namo rudrAya namaH kAlAya namaH kalavikaraNAya namo balavikaraNAya namo balapramathanAya namaH sarvabhUtadamanAya namo manonmanAya namaH ||

The 9 names are used for the rudra-sarvopachAra-pUjA in the bodhAyana payoga.

This 9-name version of the brahma-mantra was inherited by some siddhAnta-tantra-s, e.g., 1. kAlottara, which specifies it for several prayoga-s. 2. nishvAsa-kArika. The system of 9 rudra-s and 9 shakti-s is clearly derived from the bodhAyana variant. The invocation of the rudra-shakti-s specified by the female forms of the alternating names in the mantra is already seen in the bodhAyana prayoga.

The 8-name version:

OM vAmadevAya namo jyeShThAya namo rudrAya namaH kAlAya namaH kalavikaraNAya namo balapramathanAya namaH sarvabhUtadamanAya namo manonmanAya namaH ||

This is specified by the second adhyAya of the pAshupatasUtra-s. Some saiddhAntika-s prescribe this instead of the 9-name version. For example, it is explicitly provided by the deshika-s j~nAnashiva and vimalashiva, and mahArAja bhojadeva paramAra in their respective prayoga manuals.

A corrupt version of the 8-name version is also provided by the pa~ncharAtra vaiShNava sanatkumAra tantra.

The 7-name version:
OM vAmadevAya jyeShThAya namo rudrAya cha namaH |
kalavikaraNAya namo balapramathanAya namaH |
sarvabhUtadamanAya shrImanonmanAya namaH ||

This version is found in the sanatkumArIya pa~nchabrahma (siddha-shaMkara) tantra. Above is the version in the printed text. Its quasi-

metrical variant is seen in a prayoga based on it:

> vAmadevAya jyeShThAya namo rudrAya cha namaH |

namaH kalavikaraNAya balapramathanAya |
namaH sarvabhUtadamanAya manonmanAya cha ||

The more common 11, 9, and 8 name variants probably emerged early and existed side by side, depending on the theological principle onto which they were mapped.

(इति मन्त्रं जपेयुः)

---

1. अक्षय्यासनयोष् षष्ठी,
   द्वितीयाऽऽवाहने स्मृता ।
   अन्नदाने चतुर्थी स्यात्,
   शेषाः सम्बुद्धयः स्मृताः ॥↩

2. > अवधेयम् -
   > अस्मिन् प्रयोगे पितृश्राद्धरीतिः प्रदर्शिता ।
   > मातुश्श्राद्धे - सङ्कल्पे, वरणे, अर्चनादौ, अन्नजपे, दत्तकरणे तत्रतत्र
   > वक्तव्य-प्रकारः विद्वत्-पुरोहित-मुखाद् अवगन्तव्यः ।
   > एवं मातामहादि-श्राद्धे अन्य् आर्थे क्रियमाणे च ॥

   इति +अभिनव-देशिकाः ।↩

3. १. ओं भूर्भुव॒स्सुव᳚ः । तत्स॑वि॒तुर्वरे᳚ण्यं॒ भर्गो᳚ दे॒वस्य॑ धीमहि ।
   धियो॒ यो नः॑ प्रचो॒दया॑त् ॥↩

4. २. मधु॒ वाता॑ ऋताय॒ते मधु॑ क्षरन्ति॒ सिन्ध॑वः । माद्ध्वी᳚र्नस्स॒न्त्वोष॑धीः ॥ मधु॒
   नक्त॑मु॒तोषसि॒ मधु॑म॒त्पार्थि॑वँ॒ रजः॑ । मधु॒ द्यौर॑स्तु नः पि॒ता ॥
   मधु॑मान्नो॒ वन॒स्पति॒र्मधु॑माँ अस्तु॒ सूर्यः॑ । माध्वी॒र्गावो॑ भवन्तु नः ॥ (ओं मधु॒ मधु॒ मधु॑ ॥)↩

०६ पिण्डप्रदानविधिः①

पिण्डप्रदानम्

दर्भासन-कल्पनम्②

अथ अग्नेः पश्चात्,
प्राणान् आयम्य,

प्राचीनावीती,

> ...अस्यां पुण्यतिथौ .... गोत्रस्य... शर्मणः मम पितुः श्राद्धान्ते श्राद्धीय-पिण्ड-प्रदानं करिष्ये ।

इति सङ्कल्प्य,
मधु-सर्पिस्-तिल-युतान् पिण्डान् षड् आनीय,
पुष्प-धूपादिभिर् अभ्यर्च्य,
द्वेधा दक्षिणाग्रान् दर्भान् संस्तीर्य,

मार्जनम्②

पूर्वेषु दर्भेषु -

मा॒र्जयं॑न्तां॒ मम॑ पि॒तरो॑, मा॒र्जयं॑न्तां॒ मम॑ पितामहा मा॒र्जयं॑न्तां॒ मम॑ प्रपितामहाः ।

अपरेषु दर्भेषु -

मा॒र्जयं॑न्तां॒ मम॑ मा॒तरो॑, मा॒र्जयं॑न्तां॒ मम॑ पितामह्यो॑, मा॒र्जयं॑न्तां॒ मम॑ प्रपितामह्यः॑ ।

इति च स-तिला अपः पितृतीर्थेन,
त्रिः दक्षिणापवर्गं निनीय,

[[140]]

पिण्ड-स्थापनम्②

ए॒तत्तें ततासौ॒*(←नामनिर्देशः)*, ये च॒ त्वाम् अनु॑ *(जीवन्ति)*।
ए॒तत्तें पितामहासौ॒*(←नामनिर्देशः)*, ये च॒ त्वाम् अनु॑ *(जीवन्ति)*।
ए॒तत्तें प्रपितामहासौ॒*(←नामनिर्देशः)*, ये च॒ त्वाम् अनु॑ *(जीवन्ति)*।
ए॒तत्तें मातर् असौ॒*(←नामनिर्देशः)*, याश् च॒ त्वाम् अनु॑ *(जीवन्ति)*।
ए॒तत्तें पितामह्य् असौ॒*(←नामनिर्देशः)*, याश् च॒ त्वाम् अनु॑ *(जीवन्ति)*।
ए॒तत्तें प्रपितामह्य् असौ॒*(←नामनिर्देशः)*, याश् च॒ त्वाम् अनु॑ *(जीवन्ति)*।

पूर्वेषु

> ए॒तत्तें तत! ...गोत्र! .... शर्मन् !

इत्यादिना अवाचीन-पाणिः पिण्डं दत्त्वा,
'ये च॒ त्वामनु॑' इति पिण्डमूले लेपं निर्मृज्य,

> ए॒तत्तें पितामह! ... गोत्र! ... शर्मन् !

इत्यादिना अवाचीनपाणिः पिण्डं दत्त्वा,
'ये च॒ त्वामनु॑' इति पिण्डमूले लेपं निर्मृज्य,

> ए॒तत्तें प्रपितामह! ...गोत्र! ... शर्मन्!

इत्यादिना अवाचीनपाणिः पिण्डं दत्त्वा,
'ये च॒ त्वामनु॑' । इति पिण्डमूले लेपं निर्मृज्य,

अपरेषु

> ए॒तत्तें मातः! .... गोत्रे!.... (नाम्नि) देवि*(दे)*!

इत्यादिना अवाचीनपाणिः पिण्डं दत्त्वा, 'याश्च॒ त्वामनु॑' इति पिण्डमूले लेपं निर्मृज्य,

> ए॒तत्तें पितामहि! ...गोत्रे!.... (नाम्नि) देवि!

इत्यादिना अवाचीनपाणिः पिण्डं दत्त्वा, 'याश्च॒ त्वामनु॑' । इति पिण्डमूले लेपं निर्मृज्य,

> ए॒तत्तें प्रपितामहि! ... गोत्रे!... (नाम्नि) देवि!

इत्यादिना अवाचीनपाणिः पिण्डं दत्त्वा, 'याश्च॒ त्वामनु॑' । इति पिण्डमूले लेपं निर्मृज्य,

अर्चनादि②

गन्ध-पुष्प-धूप-दीपादिभिर् अभ्यर्च्य *(सुमङ्गलीमृत्याव् एव ताभ्य इति केचित्)* ,

भक्ष्य-भोज्य-फलादिकं पक्वापक्वं सर्वम्,
(अ-निवेदने तद्-भोजन-निषेधात्)
पिण्ड-देवताभ्यो निवेद्य,

तिलोदकम्②

पिण्ड-पात्रे तिलोदकम् अभिपूर्य तेन,

[[141]]

पूर्वेषु दर्भेषु

मा॒र्जयं॑न्ता॒ं मम॑ पि॒तरो॑, मा॒र्जयं॑न्ता॒ं मम॑ पिताम॒हा मा॒र्जयं॑न्ता॒ं मम॑ प्रपिताम॒हाः ।

इत्यादिक्रमेण त्रिः पूर्ववत् निनीय,
उत्थाय,

अपरेषु दर्भेषु -

मा॒र्जयं॑न्ता॒ं मम॑ मा॒तरो॑, मा॒र्जयं॑न्ता॒ं मम॑ पिताम॒ह्यो॑, मा॒र्जयं॑न्ता॒ं मम॑ प्रपिताम॒ह्यः॑ ।

इत्यादिक्रमेण त्रिः पूर्ववत् निनीय,

तर्पणम्②

उत्थाय,

१. "ये च॒ वोऽत्र॒ ये चा॒स्मास्व् आशँ॑सन्ते" इति पितृपिण्डान्
२. "याश्च॒ वोऽत्र॒ याश्चा॒स्मास्व् आशँ॑सन्ते" इति मातृपिण्डान्

१. “ते च॑ वहन्ताम्" इति पितृपिण्डान्
२. “ताश्च॑ वहन्ताम्” इति मातृपिण्डान्

१. “तृप्यं॑न्तु भवन्तः” इति पितृपिण्डान्
२. “तृप्यं॑न्तु भवत्यः” इति मातृपिण्डान्

“तृप्यं॑त॒ तृप्यं॑त॒ तृप्यं॑त ॥” इति उभयांश्च उपस्थाय

> पिता पितामहश् चैव
> तथैव प्रपितामहः ।
> तृप्तिं प्रयान्तु पिण्डेन
> मया दत्तेन भूतले ॥

इत्य् उक्त्वा

परिषेचनम्②

सव्यं जान्व् आच्य,

> पु॒त्रान्पौत्रां॑न॒भि त॒र्पयं॑न्ती॒रापो॒ मधुं॑मतीरि॒माः ।
> स्व॒धां पि॒तृभ्यो॑ अ॒मृतं॒ दुहा॑ना॒ आपो॑ दे॒वीरु॒भयाँ॑स्तर्पयन्तु ॥ [[TODO:परिष्कार्यम्]]

[[142]]

इति स-तिलोद-पात्रेण सव्योत्तर-पाणिभ्यां पितृतीर्थेन अप्रदक्षिणम् अविच्छिन्नाभिः अद्भिः परिषिच्य,

पात्र-वर्तनम्②

होमार्थानि पिण्डार्थानि च पात्राणि न्युब्ज्य,
'तृप्यं॑त॒ तृप्यं॑त॒ तृप्यं॑त' इति त्रिरनवानम् आवृत्य,
प्रोक्ष्य,
पात्राणि च द्वन्द्वम् अभ्युदाहृत्य,

प्राशनम्②

सर्वस्माद् अन्नात् किञ्चित् किञ्चित् आदाय
उपवीती -

> प्रा॒णे निविं॑ष्टो॒ऽमृतं॑ जुहोमि ।
> ब्रह्मा॑णि म आ॒त्माऽमृं॑त॒त्वायं॑ ॥

इति ग्रासमात्रं प्राश्य, आचामेत् ॥

पिण्ड-दानानि②

पुत्रकामनायां मध्यपिण्डं 1

> आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
> यथेह पुरुषोऽसत् । (शु.य. २-३३)

इति मन्त्रेण,
अरोगिण्यै पुत्र-जनन-योग्यायै दद्यात् ॥

ततः पिण्डान् ब्रह्मचारिणे,
गोभ्यो वा दद्यात्-
अप्सु वा प्रक्षिपेत् ॥

---

1. > अपां त्वौषधीनाँ रसं प्राशयामि ।
   > भूतकृतं गर्भं धत्स्व ।

   इति वैदिकसार्वभौमाः ।
   ‘वीरं मे दत्त पितरः’ इति पत्न्यै दत्वा, पत्नी प्राङ्मुखी प्राश्नीयात् - आश्वलायनः ।
   ‘यथेह पुरुषः स्यात्’ इति छन्दोगाः । "यथायम् अरपा असत् ।" (शाखान्तरे) ।↩

०७ उत्तरकर्म①

एवं श्राद्धं कृत्वा,
सात्विकत्यागं कृत्वा,
उक्त-नियमादि-युक्तः स्थित्वा,
परेद्युः श्राद्धाङ्ग-तर्पणमपि कुर्यात् ॥

॥ इति पार्वणश्राद्धप्रयोगः ॥

[[143]]

०८ अभिश्रवणमन्त्राः①

॥ अभिश्रवणमन्त्राः ॥

१. गायत्री (पु. १३२),

त᳚त् सवितु᳚र् व᳚रेण्य᳚ *(णिय)*म्
भ᳚र्गो *(=भर्जनम्)* देव᳚स्य धीमहि *(←धा धारणे/ ध्यै ध्याने / धी आराधने)* ।
धि᳚यो यो᳚ नः प्रचोद᳚यात् ॥
(परो᳚-रजसे ऽसा᳚वद् ओ᳚३म् ॥)

▼ प्र᳚चो᳚द᳚या᳚त्-स्व᳚रः᳚

प्र᳚ + चु᳚द् + णि᳚च् उ᳚दा᳚त्तः᳚ + श᳚प् अ᳚नु᳚दा᳚त्तः᳚ पि᳚त्त्वा᳚त् + [ले᳚ट् → आ᳚ट् + ति᳚प् अ᳚नु᳚दा᳚त्तः᳚ पि᳚त्त्वा᳚त्]।

प्रा᳚नु᳚दा᳚त्त᳚त्वं᳚ ति᳚ङ᳚न्त᳚स्यो᳚दा᳚त्त᳚व᳚त्त्वा᳚त्। त᳚च्च᳚ य᳚त्का᳚र᳚स᳚द्भा᳚वा᳚त्।

२. श्रीसूक्तम् (पु. २८)

भूसूक्तम् (पु. ७२)

("स्वाहा॑ ॥ भूम्या इदं न मम" इति त्यागः।)

▼ भास्करोक्त-विनियोगः

1अथ पुनराधेयमन्त्राः । तत्र गार्हपत्य आधीयमाने सर्पराज्ञीस्तिस्रोनुवर्तयति - भूमिर्भूम्नेति ॥

भूमि॑र् भू॒म्ना *(=बहुत्वेन)*, द्यौर् व॑रि॒णा *(=उरुत्वेन)*,
ऽन्तरि॑क्षम् महि॒त्वा *(असि)*।
(पुरा वृषभराशौ खे यथा) **उ॒पस्थे॑** ते देव्य् **अदि॒ते**
(सूर्यः खे यथा) **ऽग्निम्** अ॑न्ना॒दम् अ॒न्नाद्या॒या *(=अन्नाद-हिताय)* **ऽऽद॑धे** ॥

▼ Keith

(Thou art) earth in depth, sky in breadth, atmosphere in greatness;
In thy lap, O goddess Aditi, Agni
I place, food-eater for the eating of food.

▼ भट्टभास्कर-टीका

प्रथमोपरिष्टाद्बृहती, अन्त्यस्य पादस्य द्वादशाक्षरत्वात् । हे देवि **अदिते** अखाण्डिते भूमे । आहवनीयो भूमित्वेन स्तूयते । **भूम्ना** बहुत्वेन विपुलत्वेन त्वं भूमिरेवासि । **द्यौर्** असि त्वं **वरिणा** उरुत्वेन । ताद्धर्म्यात्ताच्छब्द्यम् । अ[म?]कारलोपश्छान्दसः । अन्तरिक्षमसि माहित्वा माहात्म्येन । व्यञ्जनविपर्ययः । सर्वत्रोदात्तनिवृत्तिस्वरेण तृतीयाया उदात्तत्वम् । महित्वशब्दात्तृतीयाया आकारो वा । अत्र **तवोपस्थे** उत्सङ्गे गार्हपत्यात्मनि अग्निमन्नादमन्नस्य हविषोत्तारं **अन्नाद्याय** अन्नादनसामर्थ्यात्मिकायै ऋद्ध्यै **आदधे** स्थापयामि । पचाद्यचि **अन्नादः** । इतरत्र छान्दसो भावे यत् । 'लघावन्ते' इति मध्योदात्त उपस्थशब्दः । मरुद्वृधादित्वाद्वा ॥

▼ भास्करोक्त-विनियोगः

2द्वितीया - आयमिति गायत्री ॥

आ ऽयं गौः *(→गमनशीलो अग्निस् सूर्यो वा, पुरा वृषभराशिस्थः)* पृश्निँर् **अक्रमी॒द्**
असंदन् *(→असदत् इति शाकले)* मा॒तरँ *(भूमिं, खे रोहिणीं च)* पु॒रः ।
पि॒तरँ *(द्यौः)* च, **प्र॒-यन्त्** सुवः॑ *(→स्वः॑ इति शाकले)* ॥

▼ Keith

The spotted bull hath come
And reached again the mother

And the father, faring to the heaven.

▼ भट्टभास्कर-टीका

इदानीमादित्यात्मना स्तूयते - **अयम् अग्निः गौर्** आदित्यात्मा गच्छतीति **गौः** गमनशीलः **पृश्निः** शुक्लवर्णः आदित्यानामे[मै]व वा । **आक्रमीत्** अयमेवादित्यात्मना विश्वम् आक्रामतीति ।

प्रकर्षेणाविच्छेदेन गच्छन् सुवः शोभना रतिः । छान्दसौ लुङ्लङौ ।

आक्रम्य च मातरं भूमिम् **असनत्** भूमौ मातरि शान्तोभूत् । **पितरं** दिवं **प्रयन्** प्रकर्षेण गच्छन् सर्वतो ज्वलन् धूमज्वालाभ्यामभ्रं लिहन् **सुवः** पितृस्थानीये दिवि स्वरतिरभूत् ॥

▼ भास्करोक्त-विनियोगः

3तृतीया - त्रिंशदिति गायत्री ॥

(दिने मुहूर्ता, मासे दिनानि वा)
त्रिं॒शद् **धाम॒ वि रा॑जति॒** *(आदित्यात्मा ऽग्निः)*,
(रोहिणी स्तुतिर् वा) **वाक्** *(सूर्य-)*प॑त॒ङ्-गाय॑ **शिश्रिये** *(→धीयते इति शाकले)* ।
प्रत्य्*(कूलम्)* अ॑स्य **वह॒** द्युभिः ॥

▼ Keith

Thirty places be ruleth;
Speech resorteth to the bird
Bear it with the days.

▼ भट्टभास्कर-टीका

त्रिंशद् धामानि स्थानानि **विराजति** प्रकाशवद् भवति । उभयत्रापि वचनव्यत्ययः । त्रिंशन् मुहूर्ता उच्यन्ते । [पञ्चदशाह्नः]पञ्चदश रात्रेः ।

तेषु **वाक् शिश्रिये** सिषेवे आश्रिता पतङ्गाय पतङ्गः आदित्यः । यथा 'ऋग्भिः पूर्वाह्णे दिवि देव इर्यते' इति या स्तुतिलक्षणा **वाक्** तेषु सर्वेष्वपि मुहूर्तेषु **पतङ्गं** श्रिता । कर्मणि चतुर्थी ।

तस्मात्तादृशः महानुभावः आदित्यात्मा त्वं **प्रत्यस्य** प्रति-कूलं यत्प्रकृतं तवोद्वासनं तद् **अस्य** विसृज बुद्धौ मा कृथाः । 'ससाधनां क्रियामुपसर्ग आह' इति प्रतिशब्देन प्रतिकूलमुच्यते । ततः प्रसन्नो भूत्वा **वह** हवींष्यस्माकं **द्युभिः** दिनेदिने । अधिकरणानां साधकतमत्वविवक्षया तृतीया; यथा 'स्थाल्या पचति' इति । 'ऊडिदम्' इति प्राप्तस्य विभक्त्युदात्तत्वस्य 'दिवो झल्' इति प्रतिषेधः । अस्मिन्व्याख्याने तिङः परत्वाद्वहेत्यस्य निघातो दुर्लभस्स्यात् । अथ ब्रूमः - एवं महातेजाः पतङ्गः अस्य प्रतिवह प्रतिरूपतया वर्तस्व द्युभिः तेजोभिः । अन्वादेशत्वादस्येति सर्वानुदात्तः ॥

▼ भास्करोक्त-विनियोगः

4आहवनीये तिस्रोनुवर्तयति । तत्र प्रथमा - अस्येति गायत्री ॥

अ॒स्य *(विषूव-सूर्यात्मनो ऽग्नेः)* प्रा॒णाद् **अ॑पान॒त्य्**,
(वृषभराशेर्) **अ॑न्तश् च॑रति** रोच॒ना *(→ रोहिणी दीप्तिर् वा)* ।
व्य॑ख्यन् *(=प्राकाशयन्)* महि॒षस् *(वृषभराशौ सूर्यः, भुव्य् अग्निः)* सुव॑ः *(→दिव॑म् इति शाकले)* ॥

▼ Keith

With her inspiration from his expiration,
She wandereth between the worlds;
The bull discerneth the heaven.

▼ भट्टभास्कर-टीका

अपानतीति प्रथमपादान्तः । अस्याग्नेः **रोचना** दीप्तिः रोचनशीला । 'अनुदात्तेतश्च' इति युच् । **अन्तश्** शरीरेषु **चरति** । किं कुर्वती **प्राणात्** प्राणनव्यापारात् अनन्तरम् **अपानती** अपाननव्यापारं कुर्वती । जीवानां ऊर्ध्वगमनं प्राणनं, अधोगमनम् अपाननम् । जीवश्श्वासवायुः ।

किञ्च - **महिषः** महति शरीरे सीदति । 'सदिरप्रतेः' इति षत्वम् । अन्त्यविकारश्छान्दसः । यद्वा - महतेष्टिषचि लिङ्गव्यत्ययः । महनीया सुवः शोभना **रोचना व्यख्यत्** विचष्टे प्रकाशते जीवानामन्तः । छान्दसौ लुङ् । 'अस्यतिवक्ति' इत्यादिनाङ् । 'उदात्तस्वीरतयोः' इति संहितायामडागमः स्वर्यते ।

अन्य आहुः - **अस्याग्नेः सुवः** आदित्यात्मिका **रोचना** दीप्तिः प्राणादुदयात् **अपानती** अस्तं गच्छन्ती **अन्तः** द्यावापृथिव्योर् मध्ये **चरति** । महत्यन्तरिक्षे सीदति । व्यख्यत् प्रकाशयति च द्यावापृथिव्यौ । एवं महानुभावं त्वामादधामीति ॥

▼ भास्करोक्त-विनियोगः

5द्वितीया - यत्त्वेत्यनुष्टुप् ।

यत् त्वां [10] क्रु॒द्धः **पंरो॒वपं***(=उद्वासितवान् अस्मि)*,
म॒न्युना॒ यद् अवं॑र्त्या ।
सु॒कल्पं॑म् अग्ने॒ तत् तव॒,
(यतः पुनराधाने) पुन॒स् **त्वोद्दीं॑पयामसि** ॥

▼ Keith

If thee [1] in anger I have scattered,
In rage or through misfortune,
That of thee, O Agni, be in good order,
Again thee we relight.

▼ भट्टभास्कर-टीका

तवेति तृतीयपादान्तः ॥ **यत्** येन कारणेन ॠद्धयभावेन **क्रुद्धो** ऽहं त्वामपि **परोवप** परोप्तवान् उद्वासितवानस्मि । 'णलुत्तमो वा' इति णित्त्वाभावः । 'यद्वृत्तान्नित्यम्' इति निघाताभावे 'तिङि चोदात्तवति' इति गतेरनुदात्तत्वम्, समासश्च । लिति प्रत्ययात्पूर्वस्योदात्तत्वम् ।

मन्युना शोकेन परीतो ऽहम् **अवर्त्या** दारिद्र्येण पाप्मना वा यत्त्वां **परोवप** विनाशितवान् हे अग्ने तदपि तव प्रसादात् सुकल्पं शोभनकृतिकमेव भवति । 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । 'युष्मदस्मदोर्ङसि' इति तवशब्द आद्युदात्तः । अतस्त्वां पूर्ववदेवोद्दीपयामसि उद्वपामः । 'इदन्तो मसि' ॥

▼ भास्करोक्त-विनियोगः

6अथ तृतीया - यत्त इत्यनुष्टुप् ॥

यत् ते॑ म॒न्यु-प॑रोप्तस्य
पृथि॒वीम् अनु॑ **दध्व॒से**_(←ध्वस्)_ ।
आ॒दि॒त्या विश्वे॒ तद् दे॒वा
वस॑वश् च **स॒माभ॑रन्न्** ॥

▼ Keith

Whatever of thee scattered in rage
Was spread over the earth,
That the Adityas, the All-gods
And the Vasus gathered together.

▼ भट्टभास्कर-टीका

ते तव **मन्युपरोप्तस्य** मन्युना हेतुना मयोद्वासितस्य । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् । **यत्** तेजः **पृथिवीम् अनुदध्वसे** ध्वस्तं पृथिवीम् अनुप्रविश्य वा नष्टं बभूव **तदादित्या विश्वे देवा वसवश्च समाभरन्** समाभरन्तु । 'हृग्रहोः' इति भत्वम् ॥

[[68]]

मे॒दिनी॑ दे॒वी व॒सुन्ध॑रा स्या॒द्वसु॑दा दे॒वी वा॒सवी॑ ।
ब्र॒ह्म॒व॒र्च॒सः पि॑तृ॒णाँ श्रोत्रं॒ चक्षु॒र्मनः॑ ॥

दे॒वी हिर॑ण्यगर्भिणी दे॒वी प्र॒सूव॑री (/ प्र॒सोद॑री) ।
रस॑ने (/ सद॑ने) स॒त्याय॑ने सीद ॥

स॒मुद्रव॑ती सावि॒त्री ह॒नो दे॒वी म॒ह्यङ्गी॑ (/म॒ह्यङ्गा॑)।
म॒ही (/म॒हो) धर॑णी म॒होव्यथि॑ष्टा (म॒होध्यति॑ष्ठा/ म॒होव्यवि॑ष्ठा)
शृ॒ङ्गे॑-शृ॑ङ्गे य॒ज्ञे-य॑ज्ञे विभी॒षणी॑ ॥

इन्द्रंपत्नी व्या॒पिनीं सु॒रसंरिदि॒ह ([अज्ञातस्वर-पाठान्तरम्] - सरसिज इह) ।
वा॒यु॒मतीं जल॒शयंनी श्रि॒यन्धा॒ ([अज्ञातस्वर-पाठान्तरम्] - स्वयंधा)
राजां(यां) स॒त्यन्तो॒ (/न्धो॒[जो]) परिंमेदिनी ॥ श्वो॒ परिंधत्तं गाय॒(श्वो॒परिंधत्त॒ परिंगाय /[अज्ञातस्वर-पाठान्तरम्] - सो परिधत्तंगाय)

वि॒ष्णु॒प॒त्नीं मंहीं दे॒वीं॒ मा॒ध॒वीं मांधव॒प्रियाम् ।
लक्ष्मीं प्रि॒यसंखीं दे॒वीं॒ न॒मा॒म्यच्युंतव॒ल्लभाम् ॥

ॐ ध॒नु॒र्ध॒रायैं वि॒द्महें
सर्वसि॒द्ध्यै चं धीमहि ।
तन् नों धरा प्रचो॒दयांत् ॥
(स्वाहां ॥ धुनुर्धराया इदं न मम)

शृण्व॑न्ति श्रोणा॑म् अमृ॑तस्य गोपा॑म्।
पु॑ण्याम् अस्या **उ॑पशृणोमि** वा॑चम्।
मही॑न् देवीव्ँ॑ वि॑ष्णु-पत्नीम् अजूर्या॑म्*(=अज्वराम्)*।
प्रती॑चीम् एनाँ हवि॑षा **यजामः**।

(स्वाहां ॥ विष्णुपत्न्या इदं न मम) ॥

त्रेधा॑ वि॑ष्णुर् उरु-गायो॑ *(गेयो)* **वि॑चक्रमे**।
मही॑न् दि॑वम् पृथिवी॑म् अन्त॑रिक्षम्।
त॑च् **छ्रोणै॑ति** *(अत्र)* श्र॑व*(=कीर्तिम्)* **इच्छ॑माना**।
पु॑ण्यँ श्लो॑कयँ य॑जमानाय **कृण्वती॑**॥

(स्वाहां ॥ विष्ण॒व इदं न मम) ॥

नीलासूक्तम् (पु. ६९)

("स्वाहां ॥ विष्णुपत्न्या इदं न मम" इति त्यागः)।

ओं ॥

(स्तोमं त्रयस्त्रिँशे॒! भुवंनस्य पत्नि॒!
विवंस्वद्-वाते! अ॒भि नों) गृणाहि॒ ।

▼ विस्तारः (द्रष्टुं नोद्यम्)

मध्येऋच आरम्भः??

स्तोम॑ त्रयस्त्रिँ॒शे॒! भुव॑नस्य पत्नि॒!
विव॑स्वद्-वाते! अ॒भि नो॑ **गृणाहि** *(←गृ शब्दे)* ।
घृ॒तव॑ती सवित॒र्! आधि॑पत्यै॒ꣳ
पय॑स्वती॒ **रन्ति॒र्** *(←रम्) (इयम्)* **आशा॑ नो अस्तु** ।

ध्रु॒वा दि॒शाव्ँ॑ वि॑ष्णु-प॒त्न्य् अ-घो॑रा॒
ऽस्येशा॑ना॒ सह॑सो॒, या म॒नोता॑ *(←मनस् + ऊता)*।
बृ॒ह॒स्पति॑र् मात॒रिश्वो॒त वा॒युस्
स॑न्धुवा॒ना *(←धु कम्पने)* वाता॑ अ॒भि नो॑ **गृणन्तु** ।

वि॒ष्ट॒म्भो दि॒वो, ध॒रुण॑ꣳ पृथि॒व्या,
अ॒स्येशा॑ना॒ जग॑तो॒, विष्णु॑-पत्नी ।

३. पुरुषसूक्तम् (पु. ७१)

▼ सायण-भाष्यम्

‘सहस्रशीर्षा' इति षोडशर्चं षष्ठं सूक्तम् ।
नारायण नामर्षिर्
अन्त्या त्रिष्टुप् शिष्टा अनुष्टुभः ।

अव्यक्त-महद्-आदि-विलक्षणश् चेतनो यः पुरुषः
‘पुरुषाश् च परं किंचित् ' (क. उ. ३. ११) इत्य्-आदि-श्रुतिषु प्रसिद्धः स देवता ।

तथा चानुक्रान्तं--- सहस्रशीर्षा षोळश नारायणः पौरुषमानुष्टुभं त्रिष्टुबन्तं तु' इति । गतो विनियोगः ।।

▼ भास्करोक्त-विनियोगः

1अथ पुरुषानुवाकः - सहस्रशीर्षेयादि ॥
आनुष्टुभस्सर्वोऽनुवाकः, विशेषो वक्ष्यते ।
अग्नौ पुरुषाकृतौ चीयमानायां
पुरुषशिर उपहितस्य शिरः कृत्वा
पुरुषाकृतिम् उपहितां
पुरुषेण नारायणेन यजमान उपतिष्ठते ।

पुरुषमेधे च

> 'पशून् उपाकृतान् दक्षिणतोऽवस्थाप्य
> ब्रह्मा सहस्रशीर्षा पुरुष इति पुरुषेण नारायणेन पराचा अनुशंसति ।

▍ अथ नारायणाभ्याम् उपस्थानं'

इत्यादिषु विनियोगः ।

अयम् उत्तरश् चानुवाकौ नारायणाख्यौ,
नारायणाख्येन ऋषिणा दृष्टौ ।

आभ्यां च पुरुषाख्यो नारायणः प्रतिपाद्यते ।
उक्तं च - आत्मनि पुरुषावस्थे प्रपञ्चप्रविष्टः पुरुषः, उत्तीर्णः परमात्मेति ।
पुरुषसूक्तमिति चैनं बह्वृचा आहुः ।

अथ 'सहस्रशीर्षं देवम्' इत्यपरो नारायणानुवाको भविष्यति,
यत्र परमात्मा प्रणवाख्यो नारायणः प्रतिपाद्यते ।
तस्य अग्न्य्-आदि-श्रौत-पुरुषवत् कर्म-सम्बन्धाभावाद् इहानाम्नानम् ।
▼ Jamison Brereton

90 (916)
Purusạ
Nārāyaṇa
16 verses: anuṣṭubh, except triṣṭubh 16

This is one of the best-known and most influential hymns of the Ṛgveda. Its central symbol is the púruṣa, the “man,” “person,” or “human being.”

On the surface, this hymn tells of the sacrifice of a giant man, from whose parts the world was created. The theme of creation through a cosmic sacrifice is widespread, but this hymn is not simply the retelling of an ancient tradition. The púruṣa here serves as a symbol of the sacrifice itself, which especially in the middle Vedic tradition is a locus of creative power. The púruṣa is thus similar to the later divine figure Prajāpati, who in the Brāhmaṇas personifies the sacrifice.

Indeed this late hymn represents a verse commentary on the sacrifice that prefigures the prose commentaries of the Brāhmaṇas. *(5)*

This hymn is also notable because it is the only R̥gvedic mention of the four varṇas, the hierarchical division of the social order that forms the theoretical basis for the caste system. One reason that the hymn may have been included in the R̥gveda to provide a R̥gvedic charter for such a division of society.

The identity of the Man and the sacrifice is established in the opening verse, for his thousand heads, eyes, and feet recall Agni, the sacrificial fire, and his macro cosmic equivalent, the Sun (cf. Brown 1931: 109–10). The Man comprehends the earth and extends beyond it. As Mus (1968: 549) has pointed out, the "ten-fingers' breadth" by which he exceeds the world measures from the Man's hairline to his mouth.*(4)* The Man's mouth represents speech, which marks the boundary between the imperceptible world of thought and the perceptible world created by speech.*(5)*

His mouth is also associated with eating, and in verse 2 the Man rises beyond the world "through food," that is, by making the world his food. In later texts the "eater" is the master and the "eaten" is one who benefits the master (cf. Rau 1957: 34–35). The image may therefore reflect the Man's dominance over the world.*(4)* See also X.125, in which the mouth is similarly both the locus of speech and the locus of eating.

This theme of dominance or rule continues also in verse 5 in the mutual generation of the Man and the Virāj. The word virā́j can mean either "brilliant" or "ruling, rule." The latter is the more likely sense here, and therefore this word connects the hymn to Vedic ideals of the king, who in his consecration encompasses the world in a similar way that the Man does here (Proferes 2007: esp. ch. 3). Since the term virā́j is grammatically feminine, it complements púruṣa, which is masculine in grammar and connotation.*(4)*

The Man is the "offering" (vs. 6), the sacrificial victim (vs. 15), but more especially he is the sacrifice itself that the gods, the Sādhyas,

and seers performed (vs. 7). Through this sacrifice the elements of subsequent sacrifices emerged: the “clotted-mixture” (vs. 8), the verses, chants, meters, and sacrificial formulae (vs. 9), and the sacrificial animals (vs. 10). The parts of the sacrifice also became the three upper varṇas (vss. 11–12): his mouth the brahmins, masters of knowledge and speech; his arms the rulers, the possessors of power; and his thighs the freemen or clansmen, who are the productive support of society. These three classes form parts of the sacrifice because they can participate in the sacrifice. The śūdras or “servants” are not part of the sacrifice but rather emerge from the feet of the Man, a symbol of their low social status and their exclusion from the sacrifice. Finally, the elements of the cosmos and gods themselves come forth from the sacrifice (vss. 13–14). This primeval sacrifice thus establishes the “first foundations” for the performance of the sacrifice or even for the ritual, social, divine, and visible worlds more generally (vs. 16ab), and it creates access to heaven (16cd).

The identity of the Sādhyas (in vss. 7 and 16) is not clear. Their name means “those to be brought to success,” and they appear to be ancient sacrificers whose proper ritual performance has “perfected” them and who have attained god-like status or the status of gods.*(4)*

01 सहस्रशीर्षा पुरुषः - अनुष्टुप्⑥

(बहु-देवता-सङ्ग्रहात्) सह᳚स्र*(~अनन्त)*शीर्षा **पु᳚रुषः**।
सहस्राक्षः᳚ सह᳚स्रपात् ।
स᳚ *(वक्ष्यमाणां विराजं)* भू᳚मिं विश्व᳚तो **वृत्वा**᳚ ।
अ᳚त्यतिष्ठद् दशाङ्गुल᳚म् । १

(मुख-मूर्ध्नोर् अन्तरं दशाङ्गुलम्, वाचिक+अव्यक्त-कल्पनयोश् चेति केचित्।)

▼ >

स॒हस्र॑शीर्षा॒ पुरु॑षः सहस्रा॒क्षः स॒हस्र॑पात् ।
स भूमिं॑ वि॒श्वतो॑ वृ॒त्वात्य॑तिष्ठद्दशाङ्गु॒लम् ॥

▼ >

▼ अधिमन्त्रम् - sa

- देवता - पुरुषः
- ऋषिः - नारायणः
- छन्दः - अनुष्टुप्

▼ Thomson & Solcum

सह"स्रशीर्षा पु"रुषः
सहस्राक्षः" सह"स्रपात्
स" भू"मिं विश्व"तो वृत्वा"
अ"त्य् अतिष्ठद् दशाङ्गुल"म्

▼ Vedaweb annotation

Strata

Popular for linguistic reasons, and possibly also for non-linguistic reasons

---

Pāda-label

popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)

Morph

púruṣaḥ ← púruṣa- (nominal stem)
{case:NOM, gender:M, number:SG}

sahásraśīrṣā ← sahásraśīrṣan- (nominal stem)
{case:NOM, gender:M, number:SG}

sahasrākṣáḥ ← sahasrākṣá- (nominal stem)
{case:NOM, gender:M, number:SG}

sahásrapāt ← sahásrapad- (nominal stem)
{case:NOM, gender:M, number:SG}

bhū́mim ← bhū́mi- (nominal stem)
{case:ACC, gender:F, number:SG}

sá ← sá- ~ tá- (pronoun)
{case:NOM, gender:M, number:SG}

viśvátas ← viśvátas (invariable)
{}

vr̥tvā́ ← √vr̥- (root)
{}

áti ← áti (invariable)
{}

atiṣṭhat ← √sthā- (root)
{number:SG, person:3, mood:IND, tense:IPRF, voice:ACT}

daśāṅgulám ← daśāṅgulá- (nominal stem)
{case:NOM, gender:N, number:SG}
▼ पद-पाठः

स॒हस्र॑ऽशीर्षा । पुरु॑षः । स॒ह॒स्र॒ऽअ॒क्षः । स॒हस्र॑ऽपात् ।
सः । भूमि॑म् । वि॒श्वतः॑ । वृ॒त्वा । अति॑ । अ॒ति॒ष्ठ॒त् । द॒श॒ऽअ॒ङ्गु॒लम् ॥

▼ Hellwig Grammar

- *sahasraśīrṣā ← sahasra*
- [noun], neuter
- “thousand; one-thousandth; sahasra [word].”

- *sahasraśīrṣā ← śīrṣā ← śīrṣan*

- [noun], nominative, singular, masculine
- “head; śīrṣan [word].”

- *puruṣaḥ* ← *puruṣa*
- [noun], nominative, singular, masculine
- “man; man; Puruṣa; puṃvajra; puruṣa; servant; puruṣa [word]; assistant; soldier; soul; commoner; generation; people; doll.”

- *sahasrākṣaḥ* ← *sahasra*
- [noun], neuter
- “thousand; one-thousandth; sahasra [word].”

- *sahasrākṣaḥ* ← *akṣaḥ* ← *akṣa*
- [noun], nominative, singular, masculine
- “eye; akṣa [word]; hole.”

- *sahasrapāt* ← *sahasra*
- [noun], neuter
- “thousand; one-thousandth; sahasra [word].”

- *sahasrapāt* ← *pād*
- [noun], nominative, singular, masculine
- “pād [word]; foot.”

- *sa* ← *tad*
- [noun], nominative, singular, masculine
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

- *bhūmiṃ* ← *bhūmim* ← *bhūmi*
- [noun], accusative, singular, feminine
- “floor; earth; Earth; real property; region; pṛthivī; location; Earth; place; bhūja; floor; pit; bhūmi [word]; one; hole; shop; distance; country; space; land; territory; topographic point.”

- *viśvato* ← *viśvatas*
- [adverb]
- “everywhere; around; about.”

- *vṛtvāty* ← *vṛtvā* ← *vṛ*
- [verb noun]
- “surround; accompany; cover; cover; obstruct; check; spread; envelop.”

- *vṛtvāty* ← *ati*
- [adverb]
- “very; excessively; beyond; excessively.”

- *atiṣṭhad* ← *atiṣṭhat* ← *sthā*
- [verb], singular, Imperfect
- “stay; stand; situate; exist; [in]; resist; endure; put; soak; be; stop; adhere; get stale; concentrate; grow; trust; wake; consociate; last; dwell; lie; stand; stop.”

- *daśāṅgulam* ← *daśa* ← *daśan*
- [noun], accusative, singular, neuter
- “ten; tenth; daśan [word].”

- *daśāṅgulam* ← *aṅgulam* ← *aṅgula*
- [noun], accusative, singular, neuter

- “finger; finger.”

▼ सायण-भाष्यम्

सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा । सहस्रशब्दस्योपलक्षणत्वादनन्तैः शिरोभिर्युक्त इत्यर्थः । यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात्तदीयान्येवेति सहस्रशीर्षत्वम् । एवं सहस्राक्षित्वं सहस्रपादत्वं च । **सः** पुरुषः **भूमिं** ब्रह्माण्डगोलकरूपां **विश्वतः** सर्वतः **वृत्वा** परिवेष्ट्य **दशाङ्गुलं** दशाङ्गुलपरिमितं देशम् **अत्यतिष्ठत्** अतिक्रम्य व्यवस्थितः । दशाङ्गुलमित्युपलक्षणम् । ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः॥

▼ भट्टभास्कर-टीका

अत्र पुरुषाख्या पेक्षितावरणस्थानीयं देहविशेषं महापुरुषस्य निरूपयति - सहस्रशीर्षा अनेकशिरस्कः । 'शीर्षञ्छन्दसि' इति शीर्षन्भावः । पुरि शेते इति पुरुषः । पृषोदरादिः । सहस्राक्षो ऽनेकदृष्टिः । 'बहुव्रीही सक्थ्यक्ष्णोः' इति षच् समासान्तः । सतिशिष्टस्समासान्तस्वरः प्रर्वतते । सहस्रपाद् अनेकचरणः । 'सङ्ख्यासुपूर्वस्य' इति पादशब्दस्य पद्भावः । सर्वत्र शिरःप्रभृतिकार्यसद्भावात् शिरः प्रभृतीनामनेकत्वम् । यद्वा - 'पुरुष एवेदं सर्वम्' इति तस्य विश्वात्मत्वाद् अस्मदादिसम्बन्धिनः शिरःप्रभृतयोऽवयवास् तस्यैवावयवा इति तेषामनेकत्वोपपत्तिः । सः पुरुषः भूमि भृम्यादीन् विकारान् विश्वतः सर्वतः वृत्वा व्याप्य मृदिव घटादीन् स्वाभेदेन छादयित्वा अत्यतिष्ठद् अतीत्य तिष्ठत्य् अतिक्रम्य विकारावस्थां स्वेनैव रूपेण तिष्ठति दशाङ्गुलं दशाङ्गुलिप्रमाणावच्छिन्नम् । दश अङ्गुलयः प्रमाणम् अस्येत्य् अर्हीयस्य 'अध्यर्धपूर्व' इति लुक् , 'तत्पुरुषस्याङ्गलेः' इत्यच् समासान्तः । अत्र सामर्थ्यात् हृदयाकाशपरिग्रहः । हृदयाकाशस्यैव दशाङ्गुलमित्याख्येति केचित् । हृदयं दहरं गगनं पुरुष इति पर्यायः । यद्वा - सर्गप्रकरणमिदं, अतो विकारजातं भूम्यादिकं सर्वं वृत्वा पदेनैव घनमावृत्य दशाङ्गुलमतितिष्ठति दशाङ्गुलादधोऽधिष्ठानं न करोति, अत एव भूमेर्दशाङ्गुलादधोऽङ्कुरादेरनुत्पत्तिः । सर्वगतत्वेऽपि पुरुषस्य सिसृक्षोपधानमूलकारणात्मकत्वात् सर्वकार्यदेशव्याप्त्यैव स्वप्रयोजनसम्पादनात् तदेव तस्य सर्वगतत्वमिति दशाङ्गलात्परतो न व्याप्नोति प्रयोजनाभावादिति केचित् ॥

▼ Wilson

English translation:

“**Puruṣa**, who has a thousand heads, a thousand eyes, a thousand feet, investing the earth in alldirections, exceeds (it by a space) measuring ten fingers.”

Commentary by Sāyaṇa: Ṛgveda-bhāṣya

Puruṣa = embodied spirit; or, **virāj**, the aggregate ofall living beings, spirit embodied in the egg of **Brahmā**, i.e., the universal spirit animating all creation. Thousand= an infinite number; the human **soul**, extending from the navel, takes upits abode in the heart or the humanbreast; the supreme soul, having animated the universe, is present in man, either in a minute form or of definitedimensions

▼ Jamison Brereton

The Man has a thousand heads, a thousand eyes, and a thousand feet. Having covered the earth on all sides, he extended ten fingers' breadth beyond.

▼ Griffith

A THOUSAND heads hath Purusa, a thousand eyes, a thousand feet. On every side pervading earth he fills a space ten fingers wide.

▼ Geldner

Tausendköpfig, tausendäugig, tausendfüßig ist Purusa; er bedeckte vollständig die Erde und erhob sich zehn Finger hoch darüber.

▼ Grassmann

Tausendköpfig war der Urmensch, tausendäugig, tausendfüssig; nachdem er die Erde von allen Seiten überdeckt hatte, ragte er noch zehn Finger lang darüber hinaus.

▼ Elizarenkova

Пуруша – тысячеглавый.
Тысячеглазый, тысяченогий.
Со всех сторон покрыв землю,
Он возвышался (над ней еще) на десять пальцев.

▼ अधिमन्त्रम् (VC)

- पुरुषः
- नारायणः
- निचृदनुष्टुप्
- गान्धारः

▼ ब्रह्ममुनि - विषयः

इस सूक्त में सब जड़जङ्गमका उत्पादक स्वामी परमात्मा है तथा जीवों के लिये भोग अपवर्ग देनेवाला है इत्यादि विषय हैं।

▼ ब्रह्ममुनि - पदार्थः

पदार्थान्वयभाषाः - (पुरुषः) सब जगत् में पूर्ण परमात्मा (सहस्रशीर्षा) असंख्यात शिरवाला-अनन्तज्ञानशक्तिमान् (सहस्राक्षः) असंख्यात चक्षुवाला-अनन्तदर्शनशक्तिवाला (सहस्रपात्) असंख्यात गतिवाला-विभुगतिवाला (सः) वह (भूमिम्) भुवन-ब्रह्माण्ड को (विश्वतः) सब ओर से (वृत्वा) व्याप्त होकर (दशाङ्गुलम्) दशअङ्गुलियों से मापनेयोग्य-स्थूल सूक्ष्म दश भूतों से युक्त या पैर की दशअङ्गुलियों-पादमात्र जगत् को भी (अत्यतिष्ठत्) लाँघ वर्तमान है ॥१॥

▼ ब्रह्ममुनि - भावार्थः

भावार्थभाषाः - जगत् में पूरण पुरुष परमात्मा अनन्त ज्ञानवान्, अनन्तदर्शन शक्तिमान्, अनन्त गतिमान्-विभुगतिमान् है, उसके सम्मुख सारा ब्रह्माण्ड एकदेशी अल्प है। सब स्थूल सूक्ष्म भूतमय ब्रह्माण्ड को व्यापकर अपने अन्दर रख इसके बाहिर भी वर्तमान है ॥१॥

▼ ब्रह्ममुनि - विषयः

अत्र सूक्ते सर्वस्य जडजङ्गमस्योत्पादयिता स्वामी च परमात्मा तथा जीवेभ्यो भोगापवर्गविधाता चेत्येवमादयो विषयाः सन्ति।

▼ ब्रह्ममुनि - पदार्थः

पदार्थान्वयभाषाः - (पुरुषः) विश्वस्मिन् जगति पूरणः परमात्मा (सहस्रशीर्षा) असंख्यातशिरस्कोऽनन्तज्ञानशक्तिमान् (सहस्राक्षः) असंख्यात-चक्षुष्मान्-अनन्तदर्शनशक्तिमान् (सहस्रपात्) असंख्यातगतिको विभुगतिमान् (सः) स खलु (भूमिं-विश्वतः-वृत्वा) भुवनं ब्रह्माण्डं सर्वतो व्याप्य (दशाङ्गुलम्-अत्यतिष्ठत्) दशभिरङ्गुलिभिर्मातव्यं स्थूलसूक्ष्मभूतदशकान्वितं यद्वा पादमात्रदशाङ्गुलपरिमितं ब्रह्माण्डं यथोक्तम्–“पादोऽस्य विश्वा भूतानि” तदतिक्रम्यातिष्ठद् वर्तमानोऽस्ति ॥१॥

02 पुरुष एवेदम् - अनुष्टुप्⑥

(स्व-शरीरैकदेशेन) **पु॑रुष** एवे॒॑दँ॒॑ **स॒॑र्वम्** ।
य॒॑द् भूतं॒॑ य॒॑च् च भ॒॑व्यम्।
उत॒॑ *(→तथा देवात्मभिः)* +अ॒॑मृतत्व॒॑स्ये॒॑शानः *(परमे व्योम्नि)* ।
य॒॑द् *(→यस्माद्) (ब्रह्माण्डरूपेण)* अ॒॑न्नेन *(=अशितेन)* +**अतिरो॒॑हति** । ३

▼ >

पुरु॑ष ए॒वेदं सर्वं॒ यद्भू॒तं यच्च॒ भव्य॑म् ।
उ॒ताम॑ृत॒त्वस्येशा॑नो॒ यदन्ने॑नाति॒रोह॑ति ॥

▼ >

▼ अधिमन्त्रम् - sa

- देवता - पुरुषः
- ऋषिः - नारायणः
- छन्दः - अनुष्टुप्

▼ Thomson & Solcum

पु॒॑रुष एवे॒॑दं॒॑ स॒॑र्वं
य॒॑द् भूतं॒॑ य॒॑च् च भ॒॑वियम्
उता॒॑मृतत्व॒॑स्ये॒॑शानो
य॒॑द् अ॒॑न्नेनातिरो॒॑हति

▼ Vedaweb annotation

Strata

Popular for linguistic reasons, and possibly also for non-linguistic reasons

---

Pāda-label

popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)

Morph
evá ← evá (invariable)
{}

idám ← ayám (pronoun)
{case:NOM, gender:N, number:SG}

púruṣaḥ ← púruṣa- (nominal stem)
{case:NOM, gender:M, number:SG}

sárvam ← sárva- (nominal stem)
{case:NOM, gender:N, number:SG}

bhávyam ← bhávya- (nominal stem)
{case:NOM, gender:M, number:SG}

bhūtám ← √bhū- (root)
{case:NOM, gender:M, number:SG, non-finite:PPP}

ca ← ca (invariable)
{}

yát ← yá- (pronoun)
{case:NOM, gender:N, number:SG}

yát ← yá- (pronoun)
{case:NOM, gender:N, number:SG}

amr̥tatvásya ← amr̥tatvá- (nominal stem)
{case:GEN, gender:N, number:SG}

ī́śānaḥ ← √īś- (root)
{case:NOM, gender:M, number:SG, voice:MED}

utá ← utá (invariable)
{}

ánnena ← ánna- (nominal stem)
{case:INS, gender:N, number:SG}

atiróhati ← √ruh- (root)
{number:SG, person:3, mood:IND, tense:PRS, voice:ACT}

yát ← yá- (pronoun)
{case:NOM, gender:N, number:SG}
▼ पद-पाठः

पुरु॑षः । ए॒व । इ॒दम् । सर्व॑म् । यत् । भू॒तम् । यत् । च॒ । भव्य॑म् ।
उ॒त । अ॒मृ॒त॒ऽत्वस्य॑ । ईशा॑नः । यत् । अन्ने॑न । अ॒ति॒ऽरोह॑ति ॥

▼ Hellwig Grammar

- *puruṣa* ← *puruṣaḥ* ← *puruṣa*
- [noun], nominative, singular, masculine
- “man; man; Puruṣa; puṃvajra; puruṣa; servant; puruṣa [word]; assistant; soldier; soul; commoner; generation; people; doll.”

- *evedaṃ* ← *evā* ← *eva*
- [adverb]
- “indeed; merely; thus; even; surely; same; eva [word]; successively; immediately; in truth.”

- *evedaṃ* ← *idam*
- [noun], nominative, singular, neuter
- “this; he,she,it (pers. pron.); here.”

- *sarvaṃ* ← *sarvam* ← *sarva*
- [noun], nominative, singular, neuter
- “all(a); whole; complete; sarva [word]; every(a); each(a); all; entire; sāṃnipātika; manifold; complete; all the(a); different; overall.”

- *yad* ← *yat* ← *yad*

- [noun], nominative, singular, neuter
- “who; which; yat [pronoun].”

- *bhūtaṃ* ← *bhūtam* ← *bhū*
- [verb noun], nominative, singular
- “become; be; originate; transform; happen; result; exist; be born; be; be; come to life; grow; elapse; come to mind; thrive; become; impend; show; conceive; understand; stand; constitute; serve; apply; behave.”

- *yac* ← *yat* ← *yad*
- [noun], nominative, singular, neuter
- “who; which; yat [pronoun].”

- *ca*
- [adverb]
- “and; besides; then; now; even.”

- *bhavyam* ← *bhū*
- [verb noun], nominative, singular
- “become; be; originate; transform; happen; result; exist; be born; be; be; come to life; grow; elapse; come to mind; thrive; become; impend; show; conceive; understand; stand; constitute; serve; apply; behave.”

- *utāmṛtatvasyeśāno* ← *uta*
- [adverb]
- “and; besides; uta [indecl.]; similarly; alike; even.”

- *utāmṛtatvasyeśāno* ← *amṛta*
- [noun]

- “immortal; amṛta; imperishable.”

- *utāmṛtatvasyeśāno* ← *tvasya* ← *tva*
- [noun], genitive, singular, neuter
- “state; quality; cause; reason.”

- *utāmṛtatvasyeśāno* ← *īśānaḥ* ← *īś*
- [verb noun], nominative, singular
- “govern; command; master; dominate; can; reign; control; own.”

- *yad* ← *yat*
- [adverb]
- “once [when]; because; that; if; how.”

- *annenātirohati* ← *annena* ← *anna*
- [noun], instrumental, singular, neuter
- “food; foodstuff; grain; anna [word]; eating; boiled rice; meal.”

- *annenātirohati* ← *atirohati* ← *atiruh* ← *√ruh*
- [verb], singular, Present indikative

▼ सायण-भाष्यम्

यद् **इदम्** वर्तमानं जगत्सर्वं **पुरुष एव**।
यच् च भुतम् अतीतम् जगद् **यच् च भव्यं** भविष्यज्जगत् तदपि पुरुष एव। यथास्मिन् कल्पे वर्तमानाः प्राणि-देहाः सर्वेऽपि विराट्-पुरुशस्यावयवाः - तथैवातीतागमिनोर् अपि कल्पयोर् द्रष्टव्यम् इत्य् अभिप्रायः।
उताऽपि चामृतत्वेस्य देवत्वस्यायम् ईशानः स्वामी।
यद् यस्मात् कारणादन्नेन प्राणिनां **भोग्येनाऽन्नेन** निमित्त-भूतेनाऽति-**रोहति** स्वकीयां कारणावस्थाम् अतिक्रम्य परिदृश्यमानाम् जगद्-अवस्थां प्राप्नोति, तस्मात् प्राणिनां कर्म-फल-भोगाय जगद्-अवस्था-स्वीकारान् नेदम् तस्य वस्तुत्वम् इत्य् अर्थः॥२॥

▼ भट्टभास्कर-टीका

2इदानीं पुरुषस्य वैश्वरूप्यमाह - पुरुष एवेति ॥ इदं प्रत्यक्षेण दृश्यमानं व्यक्तं स्थावरजङ्गमात्मकं यद्वर्तमानं सर्वं यच्च भूतम् अतीतं यच्च भव्यं भविष्यद् एतत्सर्वं पुरुष एव पुरुषस्यैवायं परिणामः । उत अपि च अयं पुरुषो ऽमृतत्वस्य देवत्वस्यापि ईशानः समर्थः प्रसन्नो ऽमृतत्वमपि प्रापयितुं शक्नोति । देवानामपीश्वर इति यावत् । यच्च अन्नेन अदनीयेन निमित्तेन अतिरोहति कारणावस्थामतीत्य कार्यात्मना जायते मर्त्यादि, तस्यापीशान इत्येव अयोनिजानामन्नरसपरिणामानां चेशान इति ॥

▼ Wilson

English translation:

“**Puruṣa** is verily all this (visible world), all that is, and all that is to be; he is also the lord of immortality;for he mounts beyond (his own condition) for the food (of living beings).”

Commentary by Sāyaṇa: Ṛgveda-bhāṣya

He mounts: liṭ, since he rises beyond byfood; or, he is that which grows by nourishment; or, that which expands by nourshment;

Annena = prāṇināmbhoghenānnena nimittabhūtena; "inasmuch as he assumes the condition of the world in order that sentientbeings may enjoy the fruit of their acts (prāṇinām karmaphalabhogāya), that is not his true nature": thesupreme spirit, which in its own state is inert and undiscernible, becomes the visible world, that living beings mayreap the fruit of their acts since they acquire **mokṣa** or final liberation, the **supreme spirit** is the lord of immortality;

Anna = matter (**Muṇḍaka Upaniṣad** 1.8

▼ Jamison Brereton

The Man alone is this whole (world): what has come into being and what is to be.

Moreover, he is master of immortality when he climbs beyond (this world) through food.

▼ Griffith

This Purusa is all that yet hath been and all that is to be;
The Lord of Immortality which waxes greater still by food.

▼ Geldner

Purusa allein ist diese ganze Welt, die vergangene und die zukünftige, und er ist der Herr über die Unsterblichkeit und auch über das, was durch Speise noch weiter wächst.

▼ Grassmann

Der Urmensch ist alles dies, was gewesen ist, und was sein wird; er gebietet über das Unsterbliche, was durch Speise [Opferspeise] noch höher wächst [herrlicher wird].

▼ Elizarenkova

В самом деле, Пуруша – это вселенная,
Которая была и которая будет.
Он также властвует над бессмертием.
Потому что перерастает (все) благодаря пище.

▼ अधिमन्त्रम् (VC)

- पुरुषः
- नारायणः
- निचृदनुष्टुप्
- गान्धारः

▼ ब्रह्ममुनि - पदार्थः

पदार्थान्वयभाषाः - (पुरुषः-एव) परमपुरुष परमात्मा ही (अमृतत्वस्य-ईशानः) मोक्ष का स्वामी अधिष्ठाता है (उत) और (इदं सर्वं यत्-भूतं यत्-च भव्यम्) यह सब जो उत्पन्न हुआ, जो होनेवाला जगत् है तथा (यत्-अन्नेन-अतिरोहति) जो अन्न-भोजन से बढ़ता है जीवमात्र, उसका भी परमपुरुष परमात्मा स्वामी है ॥२॥

▼ ब्रह्ममुनि - भावार्थः

भावार्थभाषाः - परमपुरुष परमात्मा जीवमात्र का तथा तदर्थ भोग अपवर्ग-मोक्ष का एवं सब उत्पन्न हुए होनेवाले जगत् का स्वामी है, ऐसा मान कर उसकी स्तुति करनी चाहिए ॥२॥

▼ ब्रह्ममुनि - पदार्थः

पदार्थान्वयभाषाः - (पुरुषः-एव) परमपुरुषः परमात्मैव (अमृतत्वस्य-ईशानः) मोक्षस्य स्वामी तथाऽधिष्ठाताऽस्ति “अमृतत्वस्यापि मोक्षस्यापि-ईशानः” [यजुः उव्वटः] (उत) अपि च (इदं सर्वं यत्-भूतं यत्-च भव्यम्) एतत् सर्वं यद् भूतं गतं यच्च भवितव्यं जगत् तथा (यत्-अन्नेन-अतिरोहति) यच्च भोजनेन वर्धते “जीवजातमन्नेनातिरोहति-उत्पद्यते तस्य सर्वस्य चैवेशानः” [यजु० महीधरः] तस्यापि परमपुरुषः परमात्मा स्वामी ह्यस्ति ॥२॥

03 एतावानस्य महिमातो - अनुष्टुप्⑥

एता॑वान् *(ब्रह्माण्डम् इति)* अस्य महिमा॑ ।
अ॑तो *(→ततोऽपि)* ज्या॑याँश् च पू॑रुषः ।

(कथम् इति चेत्-)
पा॑दोऽस्य वि॑श्वा भूता॑नि ।
(अवशिष्टस्) **त्रिपा॑द्** *(अंशः पर-देवतापूर्णः)* **अस्यामृ॑तं** *(=अविनाशी)* दिवि॑ *(=परमे व्योम्नि)* ।

▼ >

ए॒तावा॑नस्य महि॒माता॒े ज्याया॑ँश्च॒ पूरु॑षः ।
पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑ त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥

▼ >
▼ अधिमन्त्रम् - sa

- देवता - पुरुषः
- ऋषिः - नारायणः
- छन्दः - अनुष्टुप्

▼ Thomson & Solcum

एता॑वान् अस्य महिमा॑
अ॑तो ज्या॑यांश् च पू॑रुषः

पा॑दो ऽस्य वि॑श्वा भूता॑नि
त्रिपा॑द् अस्यामृ॑तं दिवि॑
▼ Vedaweb annotation

Strata
Popular for linguistic reasons, and possibly also for non-linguistic reasons

---

Pāda-label
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)

Morph
asya ← ayám (pronoun)
{case:GEN, gender:M, number:SG}

etā́vān ← etā́vant- (nominal stem)
{case:NOM, gender:M, number:SG}

mahimā́ ← mahimán- (nominal stem)
{case:NOM, gender:M, number:SG}

átas ← átas (invariable)
{}

ca ← ca (invariable)
{}

jyā́yān ← jyā́yaṁs- (nominal stem)
{case:NOM, gender:M, number:SG}

pū́ruṣaḥ ← pū́ruṣa- (nominal stem)
{case:NOM, gender:M, number:SG}

asya ← ayám (pronoun)
{case:GEN, gender:M, number:SG}

bhūtā́ni ← √bhū- (root)
{case:NOM, gender:N, number:PL, non-finite:PPP}

pā́daḥ ← pā́da- (nominal stem)
{case:NOM, gender:M, number:SG}

víśvā ← víśva- (nominal stem)
{case:NOM, gender:N, number:PL}

amṛ́tam ← amṛ́ta- (nominal stem)
{case:NOM, gender:N, number:SG}

asya ← ayám (pronoun)
{case:GEN, gender:M, number:SG}

diví ← dyú- ~ div- (nominal stem)
{case:LOC, gender:M, number:SG}

tripā́t ← tripád- (nominal stem)
{case:NOM, gender:M, number:SG}
▼ पद-पाठः

ए॒तावा॑न् । अ॒स्य॒ । म॒हि॒मा । अतः॑ । ज्याया॑न् । च॒ । पुरु॑षः ।
पादः॑ । अ॒स्य॒ । विश्वा॑ । भू॒तानि॑ । त्रि॒ऽपात् । अ॒स्य॒ । अ॒मृत॑म् । दि॒वि ॥

▼ Hellwig Grammar

- *etāvān* ← *etāvat*
- [noun], nominative, singular, masculine
- “such(a); such(a).”

- *asya* ← *idam*
- [noun], genitive, singular, masculine
- “this; he,she,it (pers. pron.); here.”

- *mahimāto* ← *mahimā* ← *mahiman*
- [noun], nominative, singular, masculine
- “greatness; power; mahiman.”

- *mahimāto* ← *atas*
- [adverb]
- “now; therefore; then; from there; hence; consequently; then; hence; henceforth.”

- *jyāyāṃś* ← *jyāyān* ← *jyāyas*
- [noun], nominative, singular, masculine
- “better; elder; greater; bigger.”

- *ca*
- [adverb]
- “and; besides; then; now; even.”

- *pūruṣaḥ* ← *pūruṣa*
- [noun], nominative, singular, masculine
- “man; man; Puruṣa.”

- *pādo* ← *pādaḥ* ← *pāda*
- [noun], nominative, singular, masculine
- “foot; one-fourth; beam; pāda; foot; foundation; pāda [word]; leg; leg; animal foot; step; foot; footfall; verse.”

- *'sya* ← *asya* ← *idam*
- [noun], genitive, singular, masculine
- “this; he,she,it (pers. pron.); here.”

- *viśvā* ← *viśva*

- [noun], nominative, plural, neuter
- “all(a); whole; complete; each(a); viśva [word]; completely; wholly.”

- *bhūtāni* ← *bhūta*
- [noun], nominative, plural, neuter
- “being; ghost; mahābhūta; monster; past; Bhūta; world; bhūta [word]; being; mythical monster; animal; entity.”

- *tripād* ← *tri*
- [noun]
- “three; tri/tisṛ [word].”

- *tripād* ← *pād*
- [noun], nominative, singular, masculine
- “pād [word]; foot.”

- *asyāmṛtaṃ* ← *asya* ← *idam*
- [noun], genitive, singular, masculine
- “this; he,she,it (pers. pron.); here.”

- *asyāmṛtaṃ* ← *amṛtam* ← *amṛta*
- [noun], nominative, singular, neuter
- “immortal; amṛta; imperishable.”

- *divi* ← *div*
- [noun], locative, singular, masculine
- “sky; Svarga; day; div [word]; heaven and earth; day; dawn.”

▼ सायण-भाष्यम्

अतीतानागत-वर्तमान-रूपं जगद् यावद् अस्ति **एतावान्** सर्वोऽप्य् अस्य पुरुषस्य महिमा। स्वकीय-सामर्थ्य-विशेषः। न तु तस्य वास्तव-स्वरूपम्।*(5)* वास्तवस्तु पुरुषोऽतो महिम्नोऽपि **ज्यायान्**। अतिशयेनाधिकः। एतच्चोभयं स्पष्टीक्रियते। अस्य पुरुषस्य विश्वा सर्वाणि भूतानि कालत्रयवर्तीनि प्राणिजातानि पादः। चतुर्थोऽंशः। अस्य पुरुषस्यावशिष्टं त्रिपात्स्वरूपममृतं विनाशरहितं सद्दिवि द्योतनात्मकेस्वप्रकाशस्वरूपे व्यवतिष्ठत इति शेशः। यद्यपि सत्यं ज्ञानमनन्तं ब्रह्म। तै. आ. ८-१- उ. २-१। इत्याम्नातस्य परब्रह्मन इयत्ताभावात्पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मस्वरूपपेक्षयाल्पमिति विवक्षितत्वात्पादत्वोपन्यासः॥३॥

▼ भट्टभास्कर-टीका

17धातेत्यादि ॥ यं यथोक्तमहिमानं पुरुषं धाता पितामहः उदाजहार ख्यापितवान् तद्विभूतित्वाद्धातुः । शक्रश्च यमुदाजहार प्रविद्वान् प्रकर्षेण जानन् प्रदिशः प्रधानदिशः चतस्रः तद्वासिनस्सर्वान् प्रविद्वान् । तं महापुरुषं एवं एवंप्रकारं विद्वान् इह लोके यः कश्चिदपि अमृतो भवति । न त्वेतज्ज्ञानादृते अन्यः पन्था विद्यते अयनाय गमनाय संसारं मुक्त्वा अपवर्गं गन्तुं अयमेव मार्ग इति ॥

16 यज्ञेन यज्ञमयजन्त - त्रिष्टुप्⑥

*(सर्वहुद्-)*यज्ञे॑न यज्ञ॑म् **अयजन्त** देवाः॑ ।
ता॑नि ध॑र्माणि प्रथमा॑न्य् **आसन्** ।
(य एवं विदुः) ते॑ ह ना॑कं *(यज्ञैः)* **महिमा॑नः***(=पूजयन्तः)* **सचन्त***(=प्राप्नुवन्ति, तैत्तिरीये - "सचन्ते")*,,
यत्र पू॑र्वे *(नानापात्रेषु पश्चात्)* साध्याः॑ **स॑न्ति** देवाः॑ । १८

▼ >

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वास्तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन् ।
ते ह॒ नाकं॑ महि॒मानः॑ सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः ॥

▼ >

▼ अधिमन्त्रम् - sa

- देवता - पुरुषः
- ऋषिः - नारायणः
- छन्दः - त्रिष्टुप्

▼ Thomson & Solcum

यज्ञे॑न यज्ञ॑म् अयजन्त देवा॑स्
ता॑नि ध॑र्माणि प्रथमा॑नि आसन्
ते॑ ह ना॑कम् महिमा॑नः सचन्त
य॑त्र पू॑र्वे साधियाः॑ स॑न्ति देवाः॑

▼ Vedaweb annotation

Strata
Popular for linguistic reasons, and possibly also for non-linguistic reasons

---

Pāda-label
popular;; repeated line
popular;; repeated line
popular;; repeated line
popular;; repeated line

Morph
ayajanta ← √yaj- (root)
{number:PL, person:3, mood:IND, tense:PRS, voice:MED}

devā́ḥ ← devá- (nominal stem)
{case:NOM, gender:M, number:PL}

yajñám ← yajñá- (nominal stem)
{case:ACC, gender:M, number:SG}

yajñéna ← yajñá- (nominal stem)
{case:INS, gender:M, number:SG}

āsan ← √as- 1 (root)
{number:PL, person:3, mood:IND, tense:IPRF, voice:ACT}

dhármāṇi ← dhárman- (nominal stem)
{case:NOM, gender:N, number:PL}

prathamā́ni ← prathamá- (nominal stem)
{case:NOM, gender:N, number:PL}

tā́ni ← sá- ~ tá- (pronoun)
{case:NOM, gender:N, number:PL}

ha ← ha (invariable)
{}

mahimā́naḥ ← mahimán- (nominal stem)
{case:NOM, gender:M, number:PL}

nā́kam ← nā́ka- (nominal stem)
{case:ACC, gender:M, number:SG}

sacanta ← √sac- 1 (root)
{number:PL, person:3, mood:INJ, tense:PRS, voice:MED}

té ← sá- ~ tá- (pronoun)
{case:NOM, gender:M, number:PL}

devā́ḥ ← devá- (nominal stem)
{case:NOM, gender:M, number:PL}

pū́rve ← pū́rva- (nominal stem)
{case:NOM, gender:M, number:PL}

sādhyā́ḥ ← sādhyá- (nominal stem)
{case:NOM, gender:M, number:PL}

sánti ← √as- 1 (root)
{number:PL, person:3, mood:IND, tense:PRS, voice:ACT}

yátra ← yátra (invariable)
{}

▼ पद-पाठः

य॒ज्ञेन॑ । य॒ज्ञम् । अ॒य॒ज॒न्त॒ । दे॒वाः । तानि॑ । धर्मा᳚णि । प्र॒थ॒मानि॑ । आ॒स॒न् ।
ते । ह॒ । नाक॑म् । म॒हि॒मानः᳚ । स॒च॒न्त॒ । यत्र॑ । पूर्वे᳚ । सा॒ध्याः । सन्ति॑ । दे॒वाः ॥

▼ Hellwig Grammar

- *yajñena* ← *yajña*
- [noun], instrumental, singular, masculine
- “yajña; religious ceremony; Vishnu; yajña [word]; Yajña; Shiva.”

- *yajñam* ← *yajña*
- [noun], accusative, singular, masculine
- “yajña; religious ceremony; Vishnu; yajña [word]; Yajña; Shiva.”

- *ayajanta* ← *yaj*
- [verb], plural, Imperfect
- “sacrifice; worship; worship.”

- *devās* ← *devāḥ* ← *deva*
- [noun], nominative, plural, masculine
- “Deva; Hindu deity; king; deity; Indra; deva [word]; God; Jina; Viśvedevās; mercury; natural phenomenon; gambling.”

- *tāni* ← *tad*
- [noun], nominative, plural, neuter

- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

- *dharmāṇi* ← *dharma*
- [noun], nominative, plural, neuter
- “Dharma; custom; dharma [word]; regulation; duty; Dharma; Dharma; Dharma; Dharma; law; law; peculiarity; justice.”

- *prathamāny* ← *prathamāni* ← *prathama*
- [noun], nominative, plural, neuter
- “first; prathama [word]; third; young; chief(a); best; antecedent.”

- *āsan* ← *as*
- [verb], plural, Imperfect
- “be; exist; become; originate; happen; result; be; dwell; be born; stay; be; equal; exist; transform.”

- *te* ← *tad*
- [noun], nominative, plural, masculine
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

- *ha*
- [adverb]
- “indeed; ha [word].”

- *nākam* ← *nāka*
- [noun], accusative, singular, masculine

- “sky; celestial sphere; Svarga; nāka [word].”

- *mahimānaḥ* ← *mahiman*
- [noun], nominative, plural, masculine
- “greatness; power; mahiman.”

- *sacanta* ← *sac*
- [verb], plural, Present injunctive
- “accompany; follow; company; obey; participate; enter.”

- *yatra*
- [adverb]
- “wherein; once [when].”

- *pūrve* ← *pūrva*
- [noun], nominative, plural, masculine
- “aforesaid(a); antecedent; previous(a); first; eastern; former(a); pūrva [word]; age-old; anterior; bygone; fore(a); predictive; firstborn; easterly; instrumental.”

- *sādhyāḥ* ← *sādhya*
- [noun], nominative, plural, masculine
- “Sādhya.”

- *santi* ← *as*
- [verb], plural, Present indikative
- “be; exist; become; originate; happen; result; be; dwell; be born; stay; be; equal; exist; transform.”

- *devāḥ* ← *deva*
- [noun], nominative, plural, masculine

- “Deva; Hindu deity; king; deity; Indra; deva [word]; God; Jina; Viśvedevās; mercury; natural phenomenon; gambling.”

▼ सायण-भाष्यम्

पूर्व प्रपञ्चेनोक्तमर्थं संक्षिप्यात्र दर्शयति । **देवाः** प्रजापतिप्राणरूपाः **यज्ञेन** यथोक्तेन मानसेन संकल्पेन यज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिम् **अयजन्त** पूजितवन्तः । तस्मात्पूजनात् **तानि** प्रसिद्धानि **धर्माणि** जगद्-रूप-विकाराणां धारकाणि **प्रथमानि** मुख्यानि **आसन्** । एतावता सृष्टि-प्रतिपादक-सूक्त-भागार्थः संगृहीतः ।

अथोपासन-तत्-फलानुवादक-भागार्थः संगृह्यते ।
यत्र यस्मिन् विराट्प्राप्ति-रूपे नाके **पूर्वे साध्याः** पुरातना विराड्-उपास्ति-साधकाः **देवाः सन्ति** तिष्ठन्ति तत् **नाकं** विराट्-प्राप्ति-रूपं स्वर्गं **ते महिमानः** तद्-उपासका महात्मानः **सचन्त** समवयन्ति प्राप्नुवन्ति ॥ ॥ १९ ॥ ॥ ७ ॥

▼ Wilson

English translation:

“By sacrifice the gods worshipped (him who is also) the sacrifice; those were the first duties. Those great ones became partakers of the heaven where the ancient deities the **Sādhyas** abide. ”

▼ Jamison Brereton

With the sacrifice the gods performed the sacrifice for themselves:
these were the first foundations.
These, its greatness, accompanied (it) to heaven’s vault,
where the ancient Sādhyas and the gods are.

▼ Whitney

Translation

1. By the sacrifice the gods sacrificed to the sacrifice; those were the first ordinances (*dhárman*); those greatnesses attach themselves to

(*sac*) the firmament, where are the ancient (*pū́rva*) perfectible (*sādhyá*) gods.

Notes

The verse is RV. i. 164. 50,* found also in VS. (xxxi. 16), TS. (iii. 5. 11^5), TA. (iii. 12. 7), MS. (iv. 10. 3), CB. (x. 2. 2^3, with comment); ⌊*Kaṭha-hss.*, p. 83;⌋ the only variant is *sacante* for *sacanta* in TS.TA.

> "This passage and vii. 79. 2 cast light upon the idea of *sādhya;* there are two kinds of gods:
>
> - those with Indra at their head and
> - the *sādhya* 'they who are to be won' (*sādhya* 'what is to be
>   brought into order, under control, or into comprehension').

> They are thus the unknown, conceived as preceding the known. Later they are worked into the ordinary classification of Vasus, Rudras, etc.; and what was formerly a serious religious problem, a hierarchy conceived as possible before the now-accepted gods (something like the pre-Olympians with the Greeks), has become an empty name."
>
> R. *⌊Also RV. x. 90. 16.⌋

▼ Griffith

Gods, sacrificing, sacrificed the victim these were the earliest holy ordinances.
The Mighty Ones attained the height of heaven, there where the Sidhyas, Gods of old, are dwelling.

▼ Griffith - AV

The Gods adored the Sacrifice with worship: these were the statutes of primeval ages. Those mighty ones attained the cope of heaven, there where the Sadhyas, Gods of old, are dwelling.

▼ Geldner

Mit dem Opfer opferten die Götter dem Opfer. Dies waren die ersten Normen des Opfers. Diese Mächte schlossen sich dem Himmel an, in dem die früheren Götter, die Sadhya´s, sich befinden.

▼ Grassmann

Durch Opfer opferten die Götter das Opfer; das waren die ersten Bräuche; sie, die erhabenen, gelangten zum Gipfel des Himmels, wo die alten zu gewinnenden [sādhyās] Götter sind.

▼ Elizarenkova

Жертвою боги пожертвовали жертве.
Таковы были первые формы (жертвоприношения).
Эти же могущества последовали на небо,
Где находятся прежние боги – садхья.

▼ अधिमन्त्रम् (VC)

- पुरुषः
- नारायणः
- विराट्त्रिष्टुप्
- धैवतः

▼ ब्रह्ममुनि - पदार्थः

पदार्थान्वयभाषाः - (देवाः)आदि विद्वान् परमर्षिजन (यज्ञेन यज्ञम्-अयजन्त) अध्यात्मयज्ञ द्वारा यजनीय-सङ्गमनीय परमात्मा को अपने अन्दरसंगत करते हैं-सम्यक् प्राप्त करते हैं (तानि धर्माणि) वे ध्यान समाधिरूप कर्म (प्रथमानि-आसन्)-प्रथम के-पूर्व के हैं (ते महिमानः) वे जीवन्मुक्त आत्माएँ (ह नाकं सचन्ते) अवश्य नितान्त सुख-मोक्ष को सेवन करते हैं (यत्र) जहाँ (साध्याः) साधनासिद्ध (देवाः) विद्वान् आत्माएँ (सन्ति) हैं ॥१६॥

▼ ब्रह्ममुनि - भावार्थः

भावार्थभाषाः - आदि विद्वान् परम ऋषिजन अध्यात्मयज्ञ के द्वारा-उपासना के द्वारा अपने अन्दर परमात्मा का साक्षात् किया करते हैं, वे सृष्टि के आरम्भ के कर्म हैं, जो मोक्ष को प्राप्त करानेवाले हैं, जहाँ जीवन्मुक्त पहुँचा करते हैं ॥१६॥

▼ ब्रह्ममुनि - पदार्थः

पदार्थान्वयभाषाः - (देवाः) आदिविद्वांसः परमर्षयः (यज्ञेन-यज्ञम्-अयजन्त) अध्यात्मयज्ञेन यजनीयं सङ्गमनीयं परमात्मानं स्वस्मिन् सङ्गमयन्ति (तानि धर्माणि प्रथमानि-आसन्) तानि ध्यानसमाधिरूपाणि कर्माणि प्राथमिकानि खल्वासन् (ते ह नाकं महिमानः सचन्त) ते जीवन्मुक्तात्मानः नितान्तसुखं मोक्षं सेवन्ते (यत्र साध्याः देवाः सन्ति) यत्र साधनासिद्धा आत्मानः सन्ति ॥१६॥

[[71]]

उत्तरनारायणानुवाकः②

[[144]]

नारायण-सूक्तम्②

५. नारायणसूक्तम् (तै. उप. २-११)

▼ विश्वास-टिप्पनी

अत्र कृत्रिमस्वरा हि राजन्ते मुद्रितग्रन्थेषु। पद्यगानम् इव गृहीतुम् उचितम्।

स॒ह॒स्र॒-शीर्॑षन् दे॒वव्ँ॒
वि॒श्वाक्षव्ँ॒ वि॒श्व-शं॑-भुवम् ।
विश्वं॑न् ना॒राय॑णन् दे॒व॒म्
अ॒क्षरं॑ पर॒मं प्र॒भुम् ।

▼ सायण-टीका

पूर्वानुवाकान्ते हृदयपुण्डरीक उपास्यं यन्महेश्वरस्वरूपं निर्दिष्टं तस्मिन्नुपास्यगुणविशेषा अस्मिन्ननुवाके विशेषेण प्रदर्श्यन्ते। तत्र प्रथमामृचमाह--

स॒ह॒स्र॒शीर्॑षं दे॒वं॒ वि॒श्वाक्षं॑ वि॒श्वशं॑भुवम्। विश्वं॑ ना॒राय॑णं दे॒व॒म॒क्षरं॑ पर॒मं प्र॒भुम्, इति।

देवं पूर्वोक्तं महेश्वरं ध्यायेदिति शेषः। कीदृशं देवम्। सहस्रशीर्षं सहस्र-शब्देनापरिमितत्वमुपलक्ष्यते। अनन्तशिरस्कमित्यर्थः। सर्वजगदात्मकं विराड्रूपं महेश्वरस्य देहः।

तथा सत्यस्मादादिशिरांसि सर्वाण्यपि तदीयान्येवेत्यनन्तशिरस्त्वम्। अनेनैव न्यायेन विश्वानि सर्वाण्यस्मदीयान्यक्षाणीन्द्रियाणि तदीयान्येवेति विश्वाक्षत्वम्। विश्वस्य सर्वस्य जगतः शं सुखमस्माद्भवतीति विश्वशंभुः(भूः), तादृशम्। उक्ते सहस्रशीर्षे विराड्रूपे देहेऽवस्थितस्य महेश्वरस्य निजस्वरूपं द्वितीयार्धेनोच्यते। विश्वं जगदात्मकम्। आरोपितस्य जगतोऽधिष्ठानव्यतिरेकेण वास्तवरूपाभावात्। नाराय-णशब्दस्य निर्वचनं पुराणेषु दर्शितम्

> "आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः प्रोक्तास्तेन नारायणः स्मृतः "

इति।

---

१ ग. ०वाच्यव०। २ ख. विस्तरेण। ३ झ. ०रस्कत्वम्। ४ ग. ०चनम्। ५ ग. झ. ०तमित्य०। ६ ख.। ०र्थः। स०।

[[728]]

जगत्कारणेषु पञ्चभूतेष्ववस्थित इत्यर्थः। यद्वा प्रकृतेः प(तिर्न)रः। तस्माज्जातिनि श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् — [प्रपा॰ १० अनु॰ १०]

यानि तानि नारशब्देनोच्यन्ते। तान्येतान्येवायनं स्थानं यस्य स नारायणः। स एवेन्द्रमित्रादिरूपेणावस्थितत्वाद्देव इत्युच्यते। तथा च शाखान्तरे मन्त्र आम्नात: — "इन्द्रं मित्रं वरुणमग्निमाहुः " इति। न क्षरतीत्यक्षरः, अश्नुत इति वा तस्याक्षरत्वम्। कारणत्वेनोत्कर्षात्परमत्वम्। नियन्तु समर्थत्वात्प्रभुत्वम्।

वि॒श्वत॑: पर॑मन् नि॒त्यवँ॒
वि॒श्वन् ना॑राय॒णँ ह॑रिम् ।
विश्व॑म् ए॒वेदं पुरु॑ष॒स्
तद् विश्व॒म् उप॑जीवति ॥

▼ सायण-टीका

द्वितीयामृचमाह--- वि॒श्वत॑: पर॑मं नि॒त्यं॒ वि॒श्वं ना॑राय॒ण ँ ह॑रिम्। विश्व॑मे॒वेदं पुरु॑ष॒स्तद्विश्व॒मुप॑जीवति, इति।

विश्वतो जगतो जडवर्गात्परममुत्कृष्टम्। ऋग्भेदेन पुनरुक्तिपरिहारो द्रष्टव्यः। यद्वा स्तुतिरूपत्वादनेन रूपेण ध्यातव्यत्वाच्च नास्ति पुनरुक्तिदोषः।विनाशरहितत्वान्नित्यत्वम्। सर्वात्मकत्वाद्विश्वत्वम्। नारायणत्वं पूर्वमेवोक्तम्। पापस्याज्ञानस्य च हरणाद्धरित्वम्। यदिदं विश्वमिदानीमज्ञानदृष्ट्या प्रदृश्यते तत्सर्वं वस्तुतत्त्वदृष्ट्या पुरुषः परमात्मैव। स च परमात्मा तद्विश्वमुपजीवति स्वस्य व्यवहारार्थमाश्रयति।

पतिवँ॒ विश्व॑स्या॒त्मेश्व॑रँ॒
शाश्व॑तँ शि॒वम् अ॑च्युतम् ।
ना॒राय॒णं म॑हा-ज्ञे॒यवँ॒
वि॒श्वात्मा॑नं प॒राय॑णम् ।

▼ सायण-टीका

तृतीयामृचमाह--- पतिं॒ विश्व॑स्या॒ऽऽत्मेश्व॑र॒ ँ शाश्व॑त ँ शि॒वमं॑च्युतम्। ना॒राय॒णं म॑हाज्ञे॒यं॒ वि॒श्वात्मा॑नं प॒राय॑णम्, इति। विश्वस्य जगतः पालकत्वात्पतिः। आत्मनां जीवानां नियाकत्वादीश्वरः। निरकान्तरं वर्तमानत्वाच्छाश्वतः। परममङ्गलत्वाच्छिवः। न च्यवत इत्यच्युतः। नारायणत्वं पूर्वमुक्तम्। ज्ञेयेषु तत्त्वेषु मध्ये प्रौढत्वान्महाज्ञेय(त्व)म्। जगदुपादानत्वेन तदभेदाद्विश्वात्मत्वम्। उत्कृष्टाधारत्वात् परायणत्वम्। सर्वमप्यारोपितं जगदधिष्ठाने वर्तते।

ना॒राय॒ण-प॑रं ब्र॒ह्म॒-
त॒त्वन् ना॑राय॒णः प॑रः ।
ना॒राय॒ण-प॑रो ज्यो॒ति॒र्-
आ॒त्मा ना॑राय॒णः प॑रः ।

▼ सायण-टीका

चतुर्थीमृचमाह---

- ना॒राय॒ णः प॑रं ब्रह्मतत्त्वं ना॑राय॒णः प॑रः। नाराय॒ णः प॑रो ज्यो॒तिरा॒त्मा ना॑राय॒णः प॑रः, इति।

- ग. पुस्तके पूर्वार्धोत्तरार्धव्यत्यासो वर्तते---"नारायणपरो ध्याता ध्यानं नारायणः परः " इत्यधिकं च।

---

१ ख. ०त्यश्रुत। २ झ. ०रः, न च्युत। ३ ख. झ. ०रमा नि०। ४ ग. ०व्यः। ०स्तु। ५ ख. ०ज्ञानाद्द्दश्य०। ६ ग. झ. ०त्पतिम्। आ०। ७ ग. ०श्वरं नियन्तारम्। नि०। ८ ग. झ. ०श्वतम्। प०। ९ ग. झ. ०च्छिवम्। न। १० ग. ०च्युतम्। ना०। ११ ख. ०रकत्वं परा०। १२ ख. ०यणं प०। १३ ख. ०यणप०।

[[729]]

[प्रपा० १० अनु० १०] कृष्णयजुर्वेदीयं तैत्तिरीयारण्यकम्। पुराणेषु नारायणशब्देन व्यवह्रियमाणो यः परमेश्वरः स एव परमुत्कृष्टं सत्यज्ञानानन्दादिवाक्यैः प्रतिपाद्यस्य ब्रह्मणस्तत्त्वम्। अतो नारायणः पर एवाऽऽस्मा म त्वपरो मूर्तिविशेषः। तथा परो ज्योतिर्यदेदुत्कृष्टं ज्योतिश्छन्दोगैः — "परं ज्योतिरुपसंपद्य " इत्याम्नातं तदपि नारायण एव। तस्मान्नारायणः परमात्मा।

य॒च् च॑ कि॒ञ्चिज् ज॑गत्य् अ॒स्मि॒न्
दृ॒श्यते॑ श्रू॒य॒तेऽपि॑ वा ।
अन्त॑र् ब॒हिश् च॑ तत् स॒र्वव्ँ॒
व्या॒प्य ना॑राय॒णस् स्थि॑तः ।(25)

▼ सायण-टीका

पञ्चमीमृचमाह---

यच्च॑ किं॒चिज्ज॑गत्स॒र्वं॒ दृश्यते॑ श्रूयते॑ श्रू॒यतेऽपि॑ वा। अन्त॑र्ब॒हिश्च॑ तत्स॒र्वं॒ व्या॒प्य ना॑राय॒णः स्थि॑तः

इति।

* जगत्यस्मिन्निति पाठो भाष्यानुरोधी, स वर्तते क्वचिदिति ग. पुस्तकटिप्पणीतो ज्ञायते।

अस्मिन्वर्तमाने जगति यत्किंचित्समीपवर्ति वस्तुजातं दृश्यते। अपि वा दूरस्थं श्रूयते। तत्सर्वं वस्तुजातमयं नारायणोऽन्तर्बहिश्च व्याप्यावस्थितः। यथा कटकमुकुटाद्याभरणस्योपादानकारणं सुवर्णमन्तर्बहिर्व्याप्यावतिष्ठते। तद्वत्।

अन॑न्त॒म् अव्य॑यङ् क॒विँ
स॑मु॒द्रे ऽन्तव्ँ॑ वि॒श्व-शं॑भुवम् ।
प॒द्म॒-को॒श-प्र॑तीका॒शँ॒
(तद्-आसनम्) **हृ॒दयं॑ञ्** चाप्य् अ॒धो-मुं॑खम् *(नोर्ध्वमुखं लोकवत्)* ।

▼ सायण-टीका

षष्ठीमृचमाह--- अन॑न्तमव्य॑यं क॒वि ँ स॑मु॒द्रेऽन्त॑ वि॒श्वशं॑भुवम्। प॒द्म॒को॒शप्र॑तीका॒श॒ ँ हृ॒दयं॑ चाप्य॒धोमुखम्, इति।

अत्र पूर्वार्धेन नारायणस्य वास्तवस्वरूपं संक्षिप्योपन्यस्यते।
अनन्तं देशपरिच्छेदरहितम्।
अव्ययं विनाशरहितम्।
कविं चिद्रूपेण सर्वज्ञम्।
समुद्रे ऽतिबहुलत्वेन समुद्रसदृशे संसारे ऽन्तम् अवसानरूपम्।
यदा नारायणस्य स्वरूपं जानाति
तदा संसारः क्षीयत इत्यर्थः।
विश्वशंभुवं सर्वस्य संसारसुखस्योत्पत्तिकारणरूपम्। "एतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति " इति श्रुत्यन्तरात्। ईदृशं नारायणस्वरूपमुपासीतेति शेषः।
उत्तरार्धेनोमासनस्थानम् उच्यते---
पद्मकोशप्रतीकाशं यथा लोकेऽष्टदलकमलस्य कोशो मध्यच्छिद्रं

तत्सदृशं
तच् च हृदय-शब्द-वाच्यम्।
लौकिकं पद्मम् ऊर्ध्वाभिमुखं हृदयपद्मं त्व् **अधोमुखम्** इति विशेषः।

अधो॑ नि॒ष्ट्या*(=ग्रीवा-बन्धः)* वि॑तस्त्या॒न्*(←१२-आङ्गुल्याम् [नाभिं यावत्])* तु॒
ना॒भ्याम् उ॑परि॒ *(मध्ये)* **तिष्ठ॑ति** ।
हृदय॑न् तद् वि॑जानी॒या॒द्
वि॒श्वस्या॑यत॒नं म॑हत् ।

▼ सायण-टीका

सप्तमीमृचमाह--- अधो॑ नि॒ष्ठ्या वि॑तस्त्या॒न्ते॒ ना॒भ्यामु॑परि॒ तिष्ठ॑ति। +हृदयं तद्विजानीयाद्विश्वस्या॑ऽऽयत॒नं म॑हत, इति।

+पदत्रयमनिश्चितस्वरकम्।

---

१ ख. ०नादि०। २ ख. ०वाक्यप्र०। ३ ख. ०परस्तीति शे०। ४ ख. झ. ०नमु०। ५ झ. लोके शतद०। ६ ०तस्त्यां तु ना। ७ ग. ०ति। जालमालाकुलं भाति विश्व०। ९२

[[730]]

निष्टिर् ग्रीवाबन्धः, तस्या अधस्ताद्वर्तते।
तत्रापि **नाभ्याम्** उपरि नाभिदेशस्योर्ध्वभागे
वितस्त्यान्ते द्वादशाङ्गुल-परिमिता वितस्तिस्तस्यामतीतायामुपरि तिष्ठति।
तद् एतन् निष्टि-नाभ्योर् मध्य-देश-वर्ति कमलं
हृदयम् इति **विजानीयात्**। तच्च हृदयं विश्वस्य सर्वस्य जगतो महदायतनम्।
मनस्तावद्धृदयपुण्डरीके वर्तते "चन्द्रमा मनो भूत्वा त्द्दयं प्राविशत् " इति श्रुत्यन्तरात्। तेव च मनसा स्वप्नवत्सर्वमिदं जगत्कल्पितम्। "मनोमूलमिदं द्वैतं यत्किंचित्सचाराचरम् " इति संप्रदायविद्भिरुक्तत्वात्।

सन्त॑तँ सि॒राभि॑स्*(=नाडीभिस्)* तु॒
लम्ब॑त्य् आ-*(पूर्वोक्त-पद्म)*को॒श॒-सन्नि॑भम् ।
तस्यान्ते॑ सुषि॒रँ॑ *(सुषुम्ना-नाडी-नालं)* सू॒क्ष्मं
तस्मि॑न्त् स॒र्वं **प्रति॑ष्ठितम्** ।

▼ सायण-टीका

अष्टमीमृचमाह--- संत॑त ँ शि॒लाभिस्तु॒ लम्ब॑त्याकोश॒सन्नि॑भम्। तस्यान्ते॑ सुषि॒र ँ सू॒क्ष्मं तस्मि॑न्त्स॒र्वं प्रतिष्ठितम्

, इति।

आकोशः। पद्मस्य मुकुलं तत्संनिभं तत्सदृशं हृदय-कमलं **लम्बति** शरीरे- मध्ये ऽधोमुखत्वेनावलम्बते।
तच् च शिराभिर् नाडीभिः संततं परितः सम्यग्व्याप्तम् "शतं चैका च हृदयस्य नाड्यः " इति श्रुत्यन्तरात्।
तस्य हृदयस्यान्ते समीपे सूक्ष्मं **सुषिरं** छिद्रं सुषुम्ना-नाडी-नालं तिष्ठति तस्मिन्सुषिरे सर्वमिदं जगत्प्रतिष्ठितमाश्रितम्। तत्र मनसि प्रविष्टे सति सर्वजगदाधारस्य ब्रह्मणोऽभिव्यज्यमानत्वात्।

तस्य॒ *(→सुषुम्ना-नाड्या)* मद्ध्ये॑ म॒हान् अ॑ग्निर् *(पाचको वैश्वानरः)*
वि॒श्वार्चि॑र् वि॒श्वतो॑मुखः ।
सोऽग्र॑-भु॒ग् विभ॑जन् ति॒ष्ठन्न्
आहा॑रम् अज॒रः क॒विः ।*(5)*

▼ सायण-टीका

नवमीमृचमाह---

तस्य॒ मध्ये॑ म॒हान॑ग्निर्वि॒श्वार्चिर्वि॒श्वतो॑मुखः। सोऽग्र॑भु॒जन्ति॒ष्ठन्नाहा॑रमज॒रः क॒विः*, इति।

* एतदग्रे ग. पुस्तके मूले "तिर्यगूर्ध्वमधःशायी रश्मयस्तस्य संतताः " इत् अधिकम्।

तस्य सुषुम्नालस्य मध्ये महान्प्रौढोऽग्निर्वर्तते। स च विश्वार्चिर्बहुज्वालोपेतः। अत एव ज्वालाविशेषैः परितोऽवस्थितासु सर्वासु माडीषु संसारणाद्विश्वतोमुखो बहुविधेश्वररूपः। सोऽग्निग्रभुक्, स्वस्य पुरतः प्राप्तमन्नं भुङ्क्त इत्यग्रभुक्।
स च भुक्तमाहारं शरीरे सर्वावयवेषु विभजन् प्रसारयंस्तिष्ठन्, अवस्थित इत्यर्थः। तथा च भगवतोक्तम्

> "अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् "

इति॥

तस्माद्भुक्तमन्नमासौ जरयति न तु स्वयं जीर्यत इत्यजरः। अत एव कविरभिज्ञः कुशल इत्यर्थः।

---

१ ग. ०र्ध्वदेशभा०। २ ग. ०तस्त्यां द्वा०। ३ ख. ०स्यामुप०। ४ ग. शिराभि०। ५ झ. कोशः। ६ झ. ०मलमाल०। ७ ग. ०षुम्णाना०।। ७ ग. ०षुम्णाना०। ८ ग. ०षुम्णाना०। ९ ख. ०विधे ०स्थिर०। ग. ०विधैश्व०।

[[731]]

स॒न्ता॒पय॑ति स्वन् दे॒हम्
आपा॑द-तल॒-मस्त॑कम् ।
तस्य॒ मद्ध्ये॒ वह्नि॑-शिखा *(→जीवः)*
अ॒णीयो॑र्ध्वा व्य॒वस्थि॑ता (←द्रविडपाठे लिङ्गव्यत्ययः) ।

▼ सायण-टीका

दशमीमृचमाह--- सं॒ता॒पय॑ति स्वं दे॒हमापा॑दतल॒वस्त॑कम्। तस्य॒ मध्ये॒ वह्नि॑शिखा अ॒णीयो॑र्ध्वा व्य॒वस्थि॑ता, इति। पादतलमारभ्य मस्तकपर्यन्तं कृत्स्नमपि स्वकीयं देहं सर्वदा संतापयति। सोऽयं शरीरगतः संतापोऽग्निसद्भावे लिङ्गम्। तस्य ज्वालाविशेषैः कृत्स्नदेहव्यापिनोऽग्नेर्मध्ये वह्निशिखा काचिज्ज्वालाऽणीयाऽत्यन्तसूक्ष्मोर्ध्वा सुषुम्नानाडीनालेनोर्ध्वं ब्रह्मरन्ध्रपर्यन्तं प्रसृत्य व्यवस्थिता विशेषेणावस्थिता।

नी॒ल-तो॑य-द॑-मध्य॒-स्था॒
वि॒द्युल्-ले॑खेव॒ भास्व॑रा ।
नी॒वार॒-शूक॑वत्*(=धान्यान्त-त्वक्-कण्टकवत्)* त॒न्वी॒
पी॒ताभा॑ स्यात् त॒नूप॑मा ।

▼ सायण-टीका

एकादशीमृचमाह--- नी॒लतो॑यदमध्य॒स्था॒ वि॒द्युल्ले॑खेव॒ भास्व॑रा। नी॒वार॒शूक॑वत्त॒न्वी पी॒ता भा॑स्वत्य॒णूप॑मा, इति। तोयमुदकं ददातीति तोयदो मेघः, स च वर्षितुं जलपूर्णत्वान्नीलवर्णः। तादृशस्य मेघस्य मध्ये स्थिता विद्युल्लेखेव। सेयं पूर्वोक्ताऽग्निशिखा भास्वरा प्रभावती नीवारबीजस्य **शूकं** दीर्घं पुच्छं यथा तनु भवति तद्वदियं शिखा तन्वी बाह्यवह्निशिखेव पीता भास्वती पीतवर्णा दीप्तियुक्ता भवेत्। सा चाणूपमा लौकिकानां तनूनां सूक्ष्मवस्तूनामुपमा भवितुं योग्या।

तस्या॑श् शिखा॒या म॑द्ध्ये
प॒रमा॑त्मा व्य॒वस्थि॑तः ।
स ब्रह्मा॒ स शिव॒स् सेन्द्र॒स्
सोऽक्ष॑रः पर॒मस् स्व॒राट् ।।(26)

▼ विश्वास-टिप्पनी

नम्बूदिरि-प्राय-पाठे प्रपञ्च-हृदयोक्ते -

> स ब्रह्मा स हरिस् स शिवस् सेन्द्र

इति च्छन्दसो व्यभिचरतितराम्।
प्रसिद्ध-नारायणार्थे हरि-शब्द आरण्यक-सम-कालीनेषु ग्रन्थेषु च न दृश्यते।
▼ सायण-टीका

द्वादशीमृचमाह--- तस्याः᳚ शिखा॒या म॑ध्ये प॒रमा॑त्मा व्य॒वस्थितः। स ब्रह्मा॒ स शिव॒ः सेन्द्रः सोऽक्ष॑रः पर॒मः स्व॒राट्, इति॥ इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकादशोऽनुवाकः॥ ११॥

तस्याः पूर्वोक्ताया वह्निशिखाया मध्ये जगत्कारणभूतः परमात्मा विशेषेणावस्थितः। तस्योपासनार्थमल्पस्थानत्वेऽपि न स्वयमल्पः, किंतु सर्वदेवात्मकः। ब्रह्मा चतुर्मुखः, शिवो गौरीपतिः, इन्द्रः स्वार्गाधिपतिः, अक्षरो जगद्धेतुर्मायाविशिष्टोऽन्तर्यामीश्वरः "क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते " इति भगवतोक्तत्वात्। परमो मायारहितः शुद्धश्चिद्रूपः। अत एव पारतन्त्र्याभावात्स्वराट्स्वयमेव राजा।

---

१ झ. ०स्तकः। त०। २ ख. ०द्धावो लि०। ३ ख. ०र्मध्येऽपि व०। ४ ग. ०षुम्णाना०। ५ ग. ०ह्निज्वालेव ६ ग. ०किकीनां। ७ ख. झ. ब्रह्म। ८ ग. झ. ०वः स हरिः से०। ९ झ. ०द्धचिद्रू०।

[[732]]

सहस्रशीर्षमित्यादिवाक्यप्रतिपाद्यं तत्त्वं पद्मकोश पद्मकोशप्रतीकाशमित्यादि- वाक्योक्तप्रकारेण ध्यायेदिति तात्पर्यार्थः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदिनिषद्येकादशोऽनुवाकः॥ २१॥

ऋ॒तँ स॒त्यं प॑रं ब्र॒ह्म॒
पु॒रुषं॑ कृष्ण॒पिङ्ग॑लम् ।
ऊ॒र्ध्वरे॑तं वि॑रूपा॒क्षं॒
वि॒श्वरू॑पाय॒ वै नमो॒ नमः᳚ ।

▼ सायण-टीका

अथ द्वादशोऽनुवाकः।

पूर्वोक्त-प्रकारेणोपासीनस्य पुरुषस्योपास्यदेवतानमस्कारार्थमेकामृचमाह--

ऋ॒त ँ स॒त्यं प॑रं ब्र॒ह्म॒ पु॒रुषं॑ कृष्ण॒पिङ्ग॑लम्। ऊ॒र्ध्वरे॑तं वि॑रूपा॒क्षं॒ वि॒श्वरू॑पाय॒ वै नमः॑, इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि द्वादशोऽनुवाकः॥ १२॥

यदेतत्परं ब्रह्म तत्सत्यमबाध्यम्। सत्यं च द्विविधम्, व्यावहारिकं पारमार्थिकं च। हिरण्यगर्भादिकं रूपं व्यावहारिकं सत्यं तन्निवारेण पारमार्थिकसत्यं प्रदर्शयितुमृतं सत्यमिति विशेष्यते। अत्यन्तसत्यमित्यर्थः। तादृशं ब्रह्म स्वभक्तानुग्रहायोमामहेश्वरात्मकं पुरुषरूपं भवति। तत्र दक्षिणे महेश्वरभागे कृष्णवर्णः। उमाभागे वामे पिङ्गलवर्णः। स च योगेन स्वकीयं रेतो ब्रह्मरन्ध्रे धृत्वोर्ध्वरेता भवति। त्रिनेत्रत्वाद्विरूपाक्षः। तादृशं परमेश्वरमनुस्मृत्येति शेषः। विश्वरूपाय जगत्कारणत्वेन सर्वजगदात्मकाय विरूपाक्षाय पुरुषायैव नमस्कारोऽस्तु॥

इति श्रीमत्सयणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतै- त्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि द्वादशोऽनुवाकः॥ १२॥

[[145]]

विष्णु-गायत्री②

॥ ६. विष्णुगायत्री ॥

ना॒रा॒य॒णाय॑ **वि॒द्महे॑**
वासुदे॒वाय॑ **धीमहि** ।
तन्नो॑ विष्णुः **प्रचो॒दयां॑त्** ॥

(लक्षणापेता आरण्यकस्वराः।)

विष्णु-सूक्तम्②

॥ विष्णुसूक्तम् ॥

▼ विस्तारः (द्रष्टुं नोद्यम्)

'विष्णोर्नुकं,' 'तदस्य प्रियं', 'प्रतद्विष्णुः,' ‘परोमात्रया’, ‘विचक्रमे’, ‘त्रिर्देवः' इति विष्णुसूक्तं निर्दिष्टं माडभूषि-वीरराघवप्रयोगग्रन्थे। तच्च तैत्तिरीयब्राह्मणे ऽनेनैव क्रमेणाम्नातम्।

गोपालदेशिक-श्राद्धप्रयोगे ऽभिश्रवणमन्त्रेषु तु प्रथमर्चो ऽनन्तरम् विष्णों॑ र॒राट॑मसि ...वैष्ण॒वम॑सि, विष्णं॑वे त्वा॥ इति ६ यजूंषि मध्ये निवेशितान्य् ऋचम् इव।

काञ्चीपुरय् एवं हि पठ्यत इति शठकोप-ताताचार्यः।

पूर्वम् अन्ते वा निवेशने नास्ति विप्रतिपत्तिः, किन्तु ऋचाम् मध्ये विलक्षणम्।
अतो ऽत्र तथा दर्शितम्।

▼ भास्करोक्त-विनियोगः

रराटीम् आसञ्जयति।

▼ विश्वास-प्रस्तुतिः

विष्णो॑ र॒राट॑म्*(=ललाटम्)* असि ।

▼ Keith

Thou art the forehead of Visnu.

▼ पद-पाठः

विष्णोः॑ । र॒राट॑म् । अ॒सि॒ ।

▼ भट्टभास्कर-टीका

10रराटीमासञ्जयति - विष्णो रराटमसीति ॥ हे रराटि विष्णोर्यज्ञात्मनो ललाटमिव प्रधानमसि । कपिलकादित्वाल्लत्वं विकल्प्यते ॥

▼ भास्करोक्त-विनियोगः

मध्यमं छदिर् अधिनिदधाति।

▼ विश्वास-प्रस्तुतिः

विष्णोः॑ पृ॒ष्ठम् अ॑सि ।

▼ Keith

Thou art the back of Visnu.

▼ पद-पाठः

विष्णोः॑ । पृ॒ष्ठम् । अ॒सि॒ ।

▼ भट्टभास्कर-टीका

11मध्यमं छदिरधिनिदधाति - विष्णोरिति ॥ विष्णोः पृष्ठं पृष्ठसदृशमसि ॥

▼ भास्करोक्त-विनियोगः

पार्श्वयोच् छदिषी*(=??)* निदधाति।

▼ विश्वास-प्रस्तुतिः

विष्णो॒श् श्नप्त्रे॑*(=मुखकोणौ)* स्थः ।

▼ Keith

Ye two are the corners' of Visnu's mouth.

▼ पद-पाठः

विष्णोः॑ । श्ञप्त्रे॒ इति॑ । स्थ॒ः ।

▼ भट्टभास्कर-टीका

12पार्श्वयोच्छदिषी निदधाति - विष्णोः श्नप्त्रे स्थ इति ॥ श्नप्त्रे शोधके स्थः । सकारस्य शकारापत्तिः । स्नपतिश्छान्दसश्शुद्धिकर्मा, औणादिकष्ट्रन्प्रत्ययः । स्नातेर्वा णिचि पुगादिः ॥

▼ भास्करोक्त-विनियोगः

दक्षिणबाहौ कुशम् उपसङ्गृह्य स्यन्द्यां प्रवर्तयति - विष्णोस्स्यूरिति ॥

▼ विश्वास-प्रस्तुतिः

विष्णो॒स् स्यूर्*(=सूची)* अ॑सि ।

▼ Keith

Thou art the thread of Visnu.

▼ पद-पाठः

विष्णोः॑ । स्यूः । अ॒सि॒ ।

▼ भट्टभास्कर-टीका

13दक्षिणबाहौ कुशमुपसङ्गृह्य स्यन्द्यां प्रवर्तयति - विष्णोस्स्यूरिति ॥ विष्णोः स्यूः सेवनी त्वमसि यज्ञस्य । षिवु तन्तुसन्ताने, 'क्विप्च' इति क्विप् 'छवोश्शूडनुनासिके च' इत्यूठ् ॥

▼ भास्करोक्त-विनियोगः

द्वारग्रन्थिं करोति - विष्णोर्ध्रुवमसीति ॥

▼ विश्वास-प्रस्तुतिः

विष्णो॑र् ध्रु॒वम् अ॑सि ।

▼ Keith

Thou art the fixed point of Visnu.

▼ पद-पाठः

विष्णोः॑ । ध्रु॒वम् । अ॒सि॒ ।

▼ भट्टभास्कर-टीका

14द्वारग्रन्थिं करोति - विष्णोर्ध्रुवमसीति ॥ विष्णुना **ध्रुवम्** अचलितं करणीयम् असि ॥

▼ भास्करोक्त-विनियोगः

हविर्धान-मण्डपम् अभिमृशति - वैष्णवमिति ॥

▼ विश्वास-प्रस्तुतिः

वै॒ष्ण॒वम् अ॑सि। विष्णं॑वे त्वा *(अभिमृशामि)*॥ [27]

▼ Keith

Thou art of Vishu; to Visnu thee!

▼ पद-पाठः

वै॒ष्ण॒वम् । अ॒सि॒ । विष्णं॑वे । त्वा॒ ॥ [27]

▼ भट्टभास्कर-टीका

वैष्णवं विष्णुदेवत्यं त्वमसि । अतो विष्णवे त्वामभिमृशामि । 'वैष्णवं हि देवतया हविर्धानम्' इति ब्राह्मणम् ॥

▼ सायणोक्त-विनियोगः

5अथ 'वैष्णवं वामनमालभेत स्पर्धमानः' इत्यस्य पशोः सूक्ते प्रतीकत्रयं दर्शयति - 'विष्णोर्नु कं वीर्याणि' इति वपायाः पुरोनुवाक्या । सेयं 'युञ्जते मनः' इत्यत्र व्याख्याता । 'प्र तद्विष्णुस्तवते' इति पुरोडाशस्य पुरोनुवाक्या । सेयं 'जुष्टो नरः' इत्यत्र व्याख्याता ॥

################# विश्वास-प्रस्तुतिः

वि॑ष्णोर् नु॒कव्ँ वीर्या॑णि **प्र॑ वोचयँ॒**
य॒ः॑ पा॑र्थिवानि **विममे॑** र॑जाँसि।
यो॑ **अ॑स्कभायद्** उ॑त्तरँ सध॑स्थवँ॒ *(अन्तरिक्षम्)*
विचक्रमाण॑स् त्रेधो॑रु-गायः॑ *(=गीतः/गतिः)* ॥

################# विश्वास-प्रस्तुतिः

▼ अधिमन्त्रम् - sa

- देवता - विष्णुः
- ऋषिः - दीर्घतमा औचथ्यः
- छन्दः - त्रिष्टुप्

▼ Thomson & Solcum

वि॑ष्णोर् नु॑ कं वीरि॑याणि प्र॑ वोचं
यः॑ पा॑र्थिवानि विममे॑ र॑जांसि
यो॑ अ॑स्कभायद् उ॑त्तरं सध॑स्थं
विचक्रमाण॑स् त्रेधो॑रुगायः॑

▼ Vedaweb annotation

Strata
Strophic

Pāda-label
genre M
genre M

genre M
genre M

Morph

kam ← kam (invariable)
{}

nú ← nú (invariable)
{}

prá ← prá (invariable)
{}

vīryầṇi ← vīryà- (nominal stem)
{case:NOM, gender:N, number:PL}

víṣṇoḥ ← víṣṇu- (nominal stem)
{case:ABL, gender:M, number:SG}

vocam ← √vac- (root)
{number:SG, person:1, mood:INJ, tense:AOR, voice:ACT}

pā́rthivāni ← pā́rthiva- (nominal stem)
{case:NOM, gender:N, number:PL}

rájāṁsi ← rájas- (nominal stem)
{case:NOM, gender:N, number:PL}

vimamé ← √mā- 1 (root)
{number:SG, person:3, mood:IND, tense:PRF, voice:MED}

yáḥ ← yá- (pronoun)
{case:NOM, gender:M, number:SG}

áskabhāyat ← √skambh^{i}- (root)
{number:SG, person:3, mood:IND, tense:IPRF, voice:ACT}

sadhástham ← sadhástha- (nominal stem)
{case:NOM, gender:N, number:SG}

úttaram ← úttara- (nominal stem)
{case:NOM, gender:N, number:SG}

yáḥ ← yá- (pronoun)
{case:NOM, gender:M, number:SG}

tredhā́ ← tredhā́ (invariable)
{}

urugāyáḥ ← urugāyá- (nominal stem)
{case:NOM, gender:M, number:SG}

vicakramāṇáḥ ← √kramⁱ- (root)
{case:NOM, gender:M, number:SG, tense:PRF, voice:MED}

▼ पद-पाठः

विष्णोः᳚ । नु । क॒म् । वी॒र्या॑णि । प्र । वो॒च॒म् । यः । पार्थि॑वानि । वि॒ऽम॒मे । रजां॑सि ।
यः । अस्क॑भायत् । उत्ऽत॑रम् । स॒धऽस्थ॑म् । वि॒ऽच॒क्र॒मा॒णः । त्रे॒धा । उ॒रु॒ऽगा॒यः ॥

▼ पद-पाठः-तैत्तिरीयः

विष्णोः᳚ । नुक॑म् । वी॒र्या॑णि । प्रेति॑ । वो॒च॒म् । यः । पार्थि॑वानि । वि॒म॒म इति॑ वि-म॒मे । रजाँ॑सि । यः । अस्क॑भायत् । उत्त॑र॒मित्युत्-त॒र॒म् । स॒धस्थ॒मिति॑ स॒ध-स्थ॒म् । वि॒च॒क्र॒मा॒ण इति॑ वि-च॒क्र॒मा॒णः । त्रे॒धा । उ॒रु॒गा॒य इत्यु॑रु-गा॒यः ।

▼ Hellwig Grammar

- *viṣṇor* ← *viṣṇoḥ* ← *viṣṇu*
- [noun], genitive, singular, masculine
- “Vishnu; Krishna; Viṣṇu; Om; Shiva.”

- *nu*
- [adverb]
- “now; already.”

- *kaṃ* ← *kam* ← *kaṃ*
- [adverb]
- “kaṃ [word].”

- *vīryāṇi* ← *vīrya*
- [noun], accusative, plural, neuter
- “potency; vīrya; heroism; potency; strength; semen; power; deed; active agent; efficacy; vīryapāramitā; gold; vigor; vīrya [word]; virility; manfulness; jewel; force.”

- *pra*
- [adverb]
- “towards; ahead.”

- *vocaṃ* ← *vocam* ← *vac*
- [verb], singular, Aorist inj. (proh.)
- “say; describe; name; tell; address; enumerate; call; state; teach; explain; say; declare; speak; define; declare; order; address; recommend; answer; deem; recite; approve; proclaim; indicate; determine; mention; designate.”

- *yaḥ* ← *yad*
- [noun], nominative, singular, masculine
- “who; which; yat [pronoun].”

- *pārthivāni* ← *pārthiva*
- [noun], accusative, plural, neuter
- “earthly; earthen; mundane; royal; tellurian; sublunar.”

- *vimame* ← *vimā* ← *√mā*
- [verb], singular, Perfect indicative

- “arrange; distribute; barter; measure; fixate.”

- *rajāṃsi* ← *rajas*
- [noun], accusative, plural, neuter
- “powder; menorrhea; dust; Rajas; atmosphere; rajas; pollen; passion; rajas [word]; sindūra; rust; tin; impurity; dark; sky.”

- *yo* ← *yaḥ* ← *yad*
- [noun], nominative, singular, masculine
- “who; which; yat [pronoun].”

- *askabhāyad* ← *askabhāyat* ← *skabhāy* ← *√skambh*
- [verb], singular, Imperfect

- *uttaraṃ* ← *uttaram* ← *uttara*
- [noun], accusative, singular, neuter
- “northern; following; upper; additional; better; more(a); last; concluding; superior; later(a); uttara [word]; prevailing; future; left; northerly; northerly; higher; second; dominant; excellent; chief(a).”

- *sadhasthaṃ* ← *sadhastham* ← *sadhastha*
- [noun], accusative, singular, neuter
- “dwelling; location; home.”

- *vicakramāṇas* ← *vicakramāṇaḥ* ← *vikram* ← *√kram*
- [verb noun], nominative, singular
- “act heroicly; stride.”

- *tredhorugāyaḥ* ← *tredhā*
- [adverb]

- “threefold.”

- *tredhorugāyaḥ* ← *uru*
- [noun]
- “wide; broad; great; uru [word]; much(a); excellent.”

- *tredhorugāyaḥ* ← *gāyaḥ* ← *gāya*
- [noun], nominative, singular, masculine

▼ सायण-भाष्यम्

हे नराः **विष्णोः** व्यापनशीलस्य देवस्य **वीर्याणि** वीरकर्माणि **नु कम्** अतिशीघ्रं **प्र वोचम्** प्रब्रवीमि । अत्र यद्यपि नु कम् इति पदद्वयं तथापि यास्केन ' नवोत्तराणि पदानि ' (नि. ३. १३) इत्युक्तत्वात् शाखान्तरे एकत्वेन पाठाच्च नु इत्येतस्मिन्नेवार्थे नु कम् इति पदद्वयम् । कानि तानीति तत्राह । **यः** विष्णुः **पार्थिवानि** पृथिवीसंबन्धीनि **रजांसि** रञ्जनात्मकानि क्षित्यादिलोकत्रयाभिमानीनि अग्निवाय्वादित्यरूपाणि रजांसि **विममे** विशेषेण निर्ममे । अत्र त्रयो लोका अपि पृथिवी शब्दवाच्याः । तथा च मन्त्रान्तरं -- यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः (ऋ. सं. १. १०८.९) इति। तैत्तिरीयेऽपि - योऽस्यां पृथिव्यामस्यायुषा' इत्युपक्रम्य ‘यो द्वितीयस्यां तृतीयस्यां पृथिव्याम्' (तै. सं. १. २. १२. १) इति । तस्मात् लोकत्रयस्य पृथिवीशब्दवाच्यत्वम् । किंच **यः** च विष्णुः **उत्तरम्** उद्गततरमतिविस्तीर्णं **सधस्थं** सहस्थानं लोकत्रयाश्रयभूतमन्तरिक्षम् **अस्कभायत्** तेषामाधारत्वेन स्तम्भितवान् निर्मितवानित्यर्थः । अनेन अन्तरिक्षाश्रितं लोकत्रयमपि सृष्टवानित्युक्तं भवति । यद्वा । यो विष्णुः पार्थिवानि पृथिवीसंबन्धीनि रजांसि पृथिव्या अधस्तनसप्तलोकान् विममे विविधं निर्मितवान् । रजःशब्दो लोकवाची, ‘ लोका रजांस्युच्यन्ते । इति यास्केनोक्तत्वात् । किंच यश्चोत्तरम् उद्गततरम् उत्तरभाविनं सधस्थं सहस्थानं पुण्यकृतां सहनिवासयोग्यं भूरादिलोकसप्तकम् अस्कभायत् स्कम्भितवान् सृष्टवानित्यर्थः ॥ स्कम्भेः 'स्तम्भुस्तुम्भु इति विहितस्य श्नः छन्दसि शायजपि' इति व्यत्ययेन शायजादेशः ॥ अथवा पार्थिवानि पृथिवीनिमित्तकानि रजांसि लोकान् विममे । भूरादिलोकत्रयमित्यर्थः । भूम्याम् उपार्जितकर्मभोगार्थत्वात् इतरलोकानां तत्कारणत्वम्। किंच यश्चोत्तरम् उत्कृष्टतरं सर्वेषां लोकानामुपरिभूतम् । अपुनरावृत्तेः तस्योत्कृष्टत्वम् । सधस्थम् उपासकानां सहस्थानं सत्यलोकमस्कभायत् स्कम्भितवान् ध्रुवं स्थापितवानित्यर्थः । किं कुर्वन् । **त्रेधा विचक्रमाणः** त्रिप्रकारं स्वसृष्टान् लोकान्विविधं क्रममाणः । विष्णोस्त्रेधा क्रमणम् इदं विष्णुर्वि चक्रमे ' (ऋ. सं. १, २२, १७) इत्यादिश्रुतिषु प्रसिद्धम् । अत एव **उरुगायः** उरुभिः महद्भिः गीयमानः अतिप्रभूतं गीयमानो वा । य एवं कृतवान् तादृशस्य विष्णोर्वीर्याणि प्र वोचम् ॥

▼ भट्टभास्कर-टीका

नुकम् इति क्षिप्रनाम । विष्णोर् **वीर्याणि** वीरकर्माणि **प्रवोचं** प्रकर्षेण ब्रवीमि । छान्दसो लुङ् । 'बहुलं छन्दस्यमाङ्योगेपि' इत्यडभावः । विष्णुर् विशेष्यते - **यः पार्थिवानि** पृथिव्य्-अन्तरिक्ष-द्युलोक-भवानि । पृथिवीशब्देन त्रयो लोका उच्यन्ते, यथा 'यो द्वितीयस्यां तृतीयस्यां पृथिव्याम्' इति ।*(5)* 'पृथिव्या ञाञौ' इत्यञ्प्रत्ययः । यः पार्थिवानि **रजांसि** ज्योतींषि आग्ना-विद्युत्-सूर्यात्मकानि **विममे** विनिर्मितवान् । यद्वा - **पार्थिवानि** पृथुषु भवानि रजांसि वसूनी विममे ।

किञ्च - **य उत्तरं सधस्थं** संस्थानं सर्वेषाम् अन्तरिक्षम् । 'सुपि स्थः' इति कः । 'सधमाधस्थयोः' इति सधादेश । तद् **अस्कभायत्** अस्तम्भयत् अधारयत् । अस्कभ्नाद् इति वक्तव्ये 'स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च' इति श्नाप्रत्ययः । 'छन्दसि शायजपि' इति व्यत्ययेन हेरभावेपि श्नश्शायजादेशः ।

किं कुर्वन्न् इत्य् आह – **विचक्रमाणस् त्रेधा** त्रिषु लोकेषु विभज्य क्रममाणः पदत्रयं कुर्वन् । लिटः कानजादेशः । **उरुगायः** उरुभिर् महात्मभिर् गायत इति उरुगायः । कै गै शब्दे, घञि 'आतो युक्चिण्कृतोः' इति युक्, थाथादिना उत्तरपदान्तोदात्तत्वम् । यद्वा - उरुभिर् गन्तव्यः । गाङ् गतौ । य इत्थमित्थमकरोत्तस्य विष्णोर्वीर्यार्णि प्रवोचम् स मेधीदाढर्यं करोत्विति ॥

▼ Wilson

English translation:

“Earnetly I glorify the exploits of **Viṣṇu**, who made the **three worlds**; who sustained the lofty aggregate site (of the spheres); thrice traversing (the whole); who is praised by the exalted.”

Commentary by Sāyaṇa: Ṛgveda-bhāṣya

Pārthivāni vimame rajāṃsi = lit. he made the earthly regions;

Pṛthivī = three worlds: atra trayo lokā api pṛthivī śabdavācyā; **Indra** and **Agni** are said to abide in the lower, middle and upper pṛthivī or world-- yad indrāgnī avamasyām pṛthīvyām madhyamasyām paramasyam uta **stha** (RV. 1.108.9; **Taittirīya Saṃhitā** 1.2.12.1); seven lower lokās are also included in the word pṛthivī;or, the term is limited to the three regions addressed in prayer, bhūḥ **bhuvar svar**; who sustained the lofty: uttaram sadhastham askabhāyat: sadastha = the firmament, as the asylum of the three regions-- lokatrayāśrayabhūtam antarikṣam; or, the seven regions above the

earth; or, the highest region of all, whence there is no return; or the above of the righteous, the **satya-loka**;

Askabhāyat = nirmitavān, created; thrice traversing: vicakramāṇas tredhā (idam viṣṇurvi cakrame: RV. 1.22.17); traversing in various ways in own created worlds

▼ Jamison Brereton

Now shall I proclaim the heroic deeds of Viṣṇu, who measured out the earthly realms,
who propped up the higher seat, having stridden out three times, the wide-ranging one.

▼ Jamison Brereton Notes

The hymn begins with an almost exact echo of the famous opening pāda of the Indra hymn I.32 índrasya nú vīryā̀ṇi prá vocam. In place of índrasya we have víṣṇoḥ and the missing syllable is made up by inserting the fairly functionless particle kam after nú.

▼ Griffith

I WILL declare the mighty deeds of Visnu, of him who measured out the earthly regions,
Who propped the highest place of congregation, thrice setting down his footstep, widely striding.

▼ Macdonell

I will proclaim the mighty deeds of Viṣṇu, Of him who measured out the earthly spaces; Who, firmly propping up the higher station, Strode out in triple regions, widely pacing.

▼ Keith

I shall proclaim the mighty deeds of Visnu
Who meted out the spaces of the earth,

Who established the highest abode,
Stepping thrice, the far-goer.

▼ Geldner

Des Vishnu Heldentaten will ich nun verkünden, der die irdischen Räume durchmessen hat, der die obere Wohnstätte stützte, nachdem er dreimal ausgeschritten war, der Weitschreiter.

▼ Grassmann

Des Vischnu grosse Thaten will ich preisen, der weit durchmessen hat der Erde Räume, Befestigt hat den höchsten Sitz des Himmels, dreimal ausschreitend mit gewalt'gen Schritten.

▼ Elizarenkova

Я хочу сейчас провозгласить героические деяния Вишну
Который измерил земные пространства,
Который укрепил верхнее общее жилище,
Трижды шагнув, (он,) далеко идущий.

▼ अधिमन्त्रम् (VC)

- विष्णुः
- दीर्घतमा औचथ्यः
- विराट्त्रिष्टुप्
- धैवतः

▼ दयानन्द-सरस्वती (हि) - विषयः

अब छः ऋचावाले १५४ एकसौ चौपनवें सूक्त का प्रारम्भ है। उसके प्रथम मन्त्र में ईश्वर और मुक्तिपद का वर्णन करते हैं ।

▼ दयानन्द-सरस्वती (हि) - पदार्थः

पदार्थान्वयभाषाः - हे मनुष्यो ! (यः) जो (पार्थिवानि) पृथिवी में विदित (रजांसि) लोकों को अर्थात् पृथिवी में विख्यात सब स्थलों को (नु) शीघ्र (विममे) अनेक प्रकार से रचता वा (यः) जो (उरुगायः) बहुत वेदमन्त्रों से गाया जाता वा स्तुति किया जाता (उत्तरम्) प्रलय से अनन्तर (सधस्थम्) एक साथ के स्थान को (त्रेधा) तीन प्रकार से (विचक्रमाणः) विशेषकर कँपाता हुआ

(अस्कभायत्) रोकता है उस (विष्णोः) सर्वत्र व्याप्त होनेवाले परमेश्वर के (वीर्याणि) पराक्रमों को (प्र वोचम्) अच्छे प्रकार कहूँ और उससे (कम्) सुख पाऊँ वैसे तुम करो ॥ १ ॥
▼ दयानन्द-सरस्वती (हि) - भावार्थः

भावार्थभाषाः - जैसे सूर्य अपनी आकर्षण शक्ति से सब भूगोलों को धारण करता है, वैसे सूर्य्यादि लोक, कारण और जीवों को जगदीश्वर धारण कर रहा है। जो इन असंख्य लोकों को शीघ्र निर्माण करता और जिसमें प्रलय को प्राप्त होते हैं, वही सबको उपासना करने योग्य है ॥ १ ॥

▼ दयानन्द-सरस्वती (हि) - अन्वयः

अन्वय: हे मनुष्या यः पार्थिवानि रजांसि नु विममे य उरुगाय उत्तरं सधस्थं त्रेधा विचक्रमाणोऽस्कभायत्तस्य विष्णोर्वीर्याणि प्रवोचमनेन कं प्राप्नुयां तथा यूयमपि कुरुत ॥ १ ॥

▼ दयानन्द-सरस्वती (हि) - विषयः

अथेश्वरमुक्तिपदवर्णनमाह ।

▼ दयानन्द-सरस्वती (हि) - पदार्थः

पदार्थान्वयभाषाः - (विष्णोः) वेवेष्टि व्याप्नोति सर्वत्र स विष्णुस्तस्य (नु) सद्यः (कम्) सुखम् (वीर्याणि) पराक्रमान् (प्र) (वोचम्) वदेयम् (यः) (पार्थिवानि) पृथिव्यां विदितानि (विममे) (रजांसि) लोकान् (यः) (अस्कभायत्) स्तभ्नाति (उत्तरम्) प्रलयादनन्तरं कारणाख्यम् (सधस्थम्) सहस्थानम् (विचक्रमाणः) विशेषेण प्रचालयन् (त्रेधा) त्रिभिः प्रकारैः (उरुगायः) य उरुभिर्बहुभिर्मन्त्रैर्गीयते स्तूयते वा ॥ १ ॥

▼ दयानन्द-सरस्वती (हि) - भावार्थः

भावार्थभाषाः - यथा सूर्यः स्वाकर्षणेन सर्वान् भूगोलान् धरति तथा सूर्यादींल्लोकान् कारणं जीवांश्च जगदीश्वरो धत्ते य इमानसंख्यलोकान् सद्यो निर्ममे यस्मिन्निमे प्रलीयन्ते च स एव सर्वैरुपास्यः ॥ १ ॥

▼ सविता जोशी ← दयानन्द-सरस्वती (म) - विषयः

या सूक्तांत परमेश्वर व मुक्तीचे वर्णन आहे. या सूक्ताच्या अर्थाची मागच्या सूक्ताच्या अर्थाबरोबर संगती जाणली पाहिजे. ॥

▼ सविता जोशी ← दयानन्द-सरस्वती (म) - भावार्थः

भावार्थभाषाः - जसा सूर्य आपल्या आकर्षणशक्तीने संपूर्ण भूगोलाला धारण करतो तसे सूर्य इत्यादी लोक, कारण व जीव यांना जगदीश्वर धारण करीत आहे. जो या असंख्य लोकांना

निर्माण करतो, ज्याच्यात प्रलय होतो त्याचीच सर्वांनी उपासना केली पाहिजे. ॥ १ ॥

त॑द् अस्य प्रिय॑म् अभि॑ पा॑थो **अश्यां**
न॑रो य॑त्र देवय॑वो*(=देवकामा)* **म॑दन्ति** ।
उरु-क्रम॑स्य स॑ हि॑ ब॑न्धुर् इत्था॑*(=इत्थं)*
वि॑ष्णोः पदे॑ परमे॑ **म॑ध्व उ॑त्सः** ॥

▼ अधिमन्त्रम् - sa

- देवता - विष्णुः
- ऋषिः - दीर्घतमा औचथ्यः
- छन्दः - त्रिष्टुप्

▼ Thomson & Solcum

त॑द् अस्य प्रिय॑म् अभि॑ पा॑थो अश्यां
न॑रो य॑त्र देवय॑वो म॑दन्ति
उरुक्रम॑स्य स॑ हि॑ ब॑न्धुर् इत्था॑
वि॑ष्णोः पदे॑ परमे॑ म॑ध्व उ॑त्सः

▼ Vedaweb annotation

Strata
Strophic

Pāda-label
genre M
genre M
genre M
genre M

Morph
abhí ← abhí (invariable)
{}

asya ← ayám (pronoun)
{case:GEN, gender:M, number:SG}

aśyām ← √naś- 1 (root)
{number:SG, person:1, mood:OPT, tense:AOR, voice:ACT}

pā́thaḥ ← pā́thas- (nominal stem)
{case:NOM, gender:N, number:SG}

priyám ← priyá- (nominal stem)
{case:NOM, gender:N, number:SG}

tát ← sá- ~ tá- (pronoun)
{case:NOM, gender:N, number:SG}

devayávaḥ ← devayú- (nominal stem)
{case:NOM, gender:M, number:PL}

mádanti ← √mad- (root)
{number:PL, person:3, mood:IND, tense:PRS, voice:ACT}

náraḥ ← nár- (nominal stem)
{case:NOM, gender:M, number:PL}

yátra ← yátra (invariable)
{}

bándhuḥ ← bándhu- (nominal stem)
{case:NOM, gender:M, number:SG}

hí ← hí (invariable)
{}

itthā́ ← itthā́ (invariable)
{}

sá ← sá- ~ tá- (pronoun)
{case:NOM, gender:M, number:SG}

urukramásya ← urukramá- (nominal stem)
{case:GEN, gender:M, number:SG}

mádhvaḥ ← mádhu- (nominal stem)
{case:GEN, gender:N, number:SG}

padé ← padá- (nominal stem)
{case:LOC, gender:N, number:SG}

paramé ← paramá- (nominal stem)
{case:LOC, gender:N, number:SG}

útsaḥ ← útsa- (nominal stem)
{case:NOM, gender:M, number:SG}

víṣṇoḥ ← víṣṇu- (nominal stem)
{case:GEN, gender:M, number:SG}

▼ पद-पाठः

तत् । अ॒स्य॒ । प्रि॒यम् । अ॒भि । पाथः॑ । अ॒श्या॒म् । नरः॑ । यत्र॑ । दे॒व॒ऽयवः॑ । मद॑न्ति ।
उ॒रु॒ऽक्र॒मस्य॑ । सः । हि । बन्धुः॑ । इ॒त्था । विष्णोः॑ । प॒दे । प॒र॒मे । मध्वः॑ । उत्सः॑ ॥

▼ Hellwig Grammar

- *tad* ← *tat* ← *tad*
- [noun], accusative, singular, neuter
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

- *asya* ← *idam*
- [noun], genitive, singular, masculine
- “this; he,she,it (pers. pron.); here.”

- *priyam* ← *priya*
- [noun], accusative, singular, neuter

- “beloved; pleasant; dear; fond(p); wanted; priya [word]; favorite; good; liked; suitable; proper.”

- *abhi*
- [adverb]
- “towards; on.”

- *pātho* ← *pāthaḥ* ← *pāthas*
- [noun], accusative, singular, neuter
- “pāthas [word]; water; place.”

- *aśyāṃ* ← *aśyām* ← *aś*
- [verb], singular, Aorist optative
- “get; reach; enter (a state).”

- *naro* ← *naraḥ* ← *nṛ*
- [noun], nominative, plural, masculine
- “man; man; nṛ [word]; crew; masculine.”

- *yatra*
- [adverb]
- “wherein; once [when].”

- *devayavo* ← *devayavaḥ* ← *devayu*
- [noun], nominative, plural, masculine
- “devout; devoted.”

- *madanti* ← *mad*
- [verb], plural, Present indikative
- “rut; intoxicate; delight; revel; rejoice; drink; ramp; exult.”

- *urukramasya* ← *urukrama*
- [noun], genitive, singular, masculine
- “Vishnu.”

- *sa* ← *tad*
- [noun], nominative, singular, masculine
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

- *hi*
- [adverb]
- “because; indeed; for; therefore; hi [word].”

- *bandhur* ← *bandhuḥ* ← *bandhu*
- [noun], nominative, singular, masculine
- “relative; bandhu [word]; association; friend; kin.”

- *itthā*
- [adverb]
- “thus; here.”

- *viṣṇoḥ* ← *viṣṇu*
- [noun], genitive, singular, masculine
- “Vishnu; Krishna; Viṣṇu; Om; Shiva.”

- *pade* ← *pada*
- [noun], locative, singular, neuter
- “word; location; foot; footprint; pada [word]; verse; footstep; metrical foot; situation; dwelling; state; step; mark; position;

trace; construction; animal foot; way; moment; social station; topographic point; path; residence; site; topic.”

- *parame* ← *parama*
- [noun], locative, singular, neuter
- “extreme; best; excellent; highest; highest; devoted(p); maximal; distant; parama [word]; very; farthermost.”

- *madhva* ← *madhvaḥ* ← *madhu*
- [noun], genitive, singular, neuter
- “honey; alcohol; sweet; nectar; madhu [word].”

- *utsaḥ* ← *utsa*
- [noun], nominative, singular, masculine
- “spring; fountain; utsa [word]; well.”

▼ सायण-भाष्यम्

अस्य महतो विष्णोः **प्रियं** प्रियभूतं **तत्** सर्वैः सेव्यत्वेन प्रसिद्धं **पाथः** । अन्तरिक्षनामैतत्, ‘पाथोऽन्तरिक्षं पथा व्याख्यातम्' (निरु. ६. ७) इति यास्केनोक्तत्वात्। अविनश्वरं ब्रह्मलोकमित्यर्थः। **अश्याम्** व्याप्नुयाम् । तदेव विशेष्यते । **यत्र** स्थाने **देवयवः** देवं द्योतनस्वभावं विष्णुमात्मन इच्छन्तो यज्ञदानादिभिः प्राप्तुमिच्छन्तः **नरः मदन्ति** तृप्तिमनुभवन्ति । तदश्यामित्यन्वयः । पुनरपि तदेव विशेष्यते । **उरुक्रमस्य** अत्यधिकं सर्वं जगदाक्रममाणस्य तत्तदात्मना अत एब **विष्णोः** व्यापकस्य परमेश्वरस्य **परमे** उत्कृष्टे निरतिशये केवलसुखात्मके **पदे** स्थाने **मध्वः** मधुरस्य **उत्सः** निष्यन्दो वर्तते । तदश्याम् । यत्र क्षुत्तृष्णाजरामरणपुनरावृत्त्यादिभयं नास्ति संकल्पमात्रेण अमृतकुल्यादिभोगा: प्राप्यन्ते तादृशमित्यर्थः। ततोऽधिकं नास्तीत्याह । **इत्था** इत्थमुक्तप्रकारेण **स हि बन्धुः** स खलु सर्वेषां सुकृतिनां बन्धुभूतो हितकरः वा तस्य पदं प्राप्तवतां न पुनरावृत्तेः । ‘ न च पुनरावर्तते ' इति श्रुतेस्तस्य बन्धुत्वम् । हिशब्दः सर्वश्रुतिस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः ॥

4अथ चतुर्थीमाह - देवयवो देवानिच्छन्तो नरो यजमाना यत्र भागीरथीजले मदन्ति हृष्यन्ति । अस्य विष्णोः प्रियं तत्पाथो भागीरथीजलं अभ्यश्यां अभितो व्याप्तवान् । उरुक्रमस्य विस्तीर्णपादस्य विष्णोः परमे पदे तृतीये पादे बन्धुः संबद्धो मध्वो मधुर उत्सो भागीरथीप्रवाह इत्था हि एवंविधः । हिशब्दः सर्वलोकप्रसिद्धिद्योतनार्थः ॥

▼ Wilson

English translation:

“May I attain his favourite path, in which god-seeking men delight; (the path) of that wide-stepping **Viṣṇu**, in whose exalted station there is a (perpetual) flow of felicity; for to such a degree is he the friend (of the pious).”

Commentary by Sāyaṇa: Ṛgveda-bhāṣya

His favourite path: the firmament: patho anatarikṣam

▼ Jamison Brereton

Might I reach that dear cattle-pen of his, where men seeking the gods find elation,
for exactly that is the bond to the wide-striding one: the wellspring of honey in the highest step of Viṣṇu.

▼ Griffith

May I attain to that his well-loved mansion where men devoted to the Gods are happy.
For there springs, close akin to the Wide-Strider, the well of meath in Visnu's highest footstep.

▼ Macdonell

I would attain to that his dear dominion Where men devoted to the gods do revel. In the wide-striding Viṣṇu's highest footstep There is a spring of mead: such is our kinship.

▼ Geldner

An seinen lieben Zufluchtsort möchte ich gelangen, an dem die gottergebenen Männer schwelgen, denn dort ist diese

Genossenschaft des Weitschreitenden. In der höchsten Fußspur des Vishnu ist der Quell des Honigs.

▼ Grassmann

O möcht' ich seinen lieben Sitz erreichen, in dem die frommen Männer selig leben; Denn das sind recht des mächt'gen Schreiters Freunde, und Süsses quillt an Vischnu's höchster Fussspur.

▼ Elizarenkova

Я хотел бы достигнуть этого милого убежища его,
Где опьяняются мужи, преданные богам:
В самом деле, ведь там родство широко шагающего.
В высшем следе Вишну – источник меда.

▼ अधिमन्त्रम् (VC)

- विष्णुः
- दीर्घतमा औचथ्यः
- त्रिष्टुप्
- धैवतः

▼ दयानन्द-सरस्वती (हि) - विषयः

फिर उसी विषय को अगले मन्त्र में कहा है ।

▼ दयानन्द-सरस्वती (हि) - पदार्थः

पदार्थान्वयभाषाः - मैं (यत्र) जिसमें (देवयवः) दिव्य भोगों की कामना करनेवाले (नरः) अग्रगन्ता उत्तम जन (मदन्ति) आनन्दित होते हैं (तत्) उस (अस्य) इस (उरुक्रमस्य) अनन्त पराक्रमयुक्त (विष्णोः) व्यापक परमात्मा के (प्रियम्) प्रिय (पाथः) मार्ग को (अभ्यश्याम्) सब ओर से प्राप्त होऊँ, जिस परमात्मा के (परमे) अत्युत्तम (पदे) प्राप्त होने योग्य मोक्ष पद में (मधवः) मधुरादि गुणयुक्त पदार्थ का (उत्सः) कूपसा तृप्ति करनेवाला गुण वर्त्तमान है (सः, हि) वही (इत्था) इस प्रकार से हमारा (बन्धुः) भाई के समान दुःख विनाश करने से सुख देनेवाला है ॥ ५ ॥

▼ दयानन्द-सरस्वती (हि) - भावार्थः

भावार्थभाषाः - इस मन्त्र में उपमा और वाचकलुप्तोपमालङ्कार हैं। जो परमेश्वर की वेदद्वारा दी हुई आज्ञा के अनुकूल चलते हैं, वे मोक्ष सुख को प्राप्त होते हैं। जैसे जन बन्धु को प्राप्त होकर

सहायता को पाते हैं वा प्यासे जन मीठे जल से पूर्ण कुये को पाकर तृप्त होते हैं, वैसे परमेश्वर को प्राप्त होकर पूर्ण आनन्द को प्राप्त होते हैं ॥ ५ ॥

▼ दयानन्द-सरस्वती (हि) - अन्वयः

अन्वय: अहं यत्र देवयवो नरो मदन्ति तदस्योरुक्रमस्य विष्णोः प्रियं पाथोभ्यश्यां यस्य परमे पदे मध्व उत्सइव तृप्तिकरो गुणो वर्त्तते स हि इत्था नो बन्धुरिवास्ति ॥ ५ ॥

▼ दयानन्द-सरस्वती (हि) - विषयः

पुनस्तमेव विषयमाह ।

▼ दयानन्द-सरस्वती (हि) - पदार्थः

पदार्थान्वयभाषाः - (तत्) (अस्य) (प्रियम्) येन प्रीणाति तत् (अभि) (पाथः) वर्त्म (अश्याम्) प्राप्नुयाम् (नरः) नेतारः (यत्र) यस्मिन् (देवयवः) ये देवान् दिव्यान् भोगान् कामयन्ते (मदन्ति) आनन्दयन्ति (उरुक्रमस्य) बहुपराक्रमस्य (सः) (हि) खलु (बन्धुः) दुःखविनाशकत्वेन सुखप्रदः (इत्था) अनेन प्रकारेण (विष्णोः) व्यापकस्य (पदे) प्राप्तव्ये (परमे) अत्युत्तमे मोक्षे पदे (मध्वः) मधुरादिरसयुक्तस्य (उत्सः) कूपइव तृप्तिकरः ॥ ५ ॥

▼ दयानन्द-सरस्वती (हि) - भावार्थः

भावार्थभाषाः - अत्रोपमावाचकलुप्तोपमालङ्कारौ। ये परमेश्वरेण वेदद्वारा दत्तमाज्ञामनुगच्छन्ति ते मोक्षसुखमश्नुवते। यथा जना बन्धुं प्राप्य सहायं लभन्ते तृषिता वा मधुरजलं कूपं प्राप्य तृप्यन्ति तथा परमेश्वरं प्राप्य पूर्णाऽनन्दा जायन्ते ॥ ५ ॥

▼ सविता जोशी ← दयानन्द-सरस्वती (म) - भावार्थः

भावार्थभाषाः - या मंत्रात उपमा व वाचकलुप्तोपमालंकार आहेत. जे परमेश्वराने वेदाद्वारे दिलेल्या आज्ञेप्रमाणे वागतात ते मोक्षसुख प्राप्त करतात. जसे लोक बंधूकडून साह्य प्राप्त करतात किंवा तृषार्त लोक विहिरीद्वारे मधुर जल प्राप्त करून तृप्त होतात तसे ते परमेश्वराला प्राप्त करून आनंद भोगतात. ॥ ५ ॥

प्र॒ त॒द् वि॒ष्णुः **स्तवते** *(=स्तूयते)* वी॒र्ये॑ण
मृ॒गो॒ न॒ भी॒मः॒ कु॑च॒रो॒ गि॑रि॒ष्ठाः॒ ।
य॒स्यो॒रु॒षु त्रि॒षु॒ वि॒क्र॒म॒णेष्व्
अधिक्षिय॒न्ति भु॒व॒नानि वि॒श्वा ॥

▼ अधिमन्त्रम् - sa

- देवता - विष्णुः
- ऋषिः - दीर्घतमा औचथ्यः

- छन्दः - त्रिष्टुप्

▼ Thomson & Solcum

प्र॑ त॑द् वि॑ष्णु स्तवते वीरि॑येण
मृगो॑ न॑ भीमः॑ कुचरो॑ गिरिष्ठाः॑
य॑स्योरु॑षु त्रिषु॑ विक्र॑मणेषु
अधिक्षिय॑न्ति भु॑वनानि वि॑श्वा

▼ Vedaweb annotation

Strata
Strophic

Pāda-label
genre M
genre M
genre M
genre M

Morph
prá ← prá (invariable)
{}

stavate ← √stu- (root)
{number:SG, person:3, mood:IND, tense:PRS, voice:MED}

tát ← sá- ~ tá- (pronoun)
{case:NOM, gender:N, number:SG}

vīryèṇa ← vīryà- (nominal stem)
{case:INS, gender:N, number:SG}

víṣṇuḥ ← víṣṇu- (nominal stem)
{case:NOM, gender:M, number:SG}

bhīmáḥ ← bhīmá- (nominal stem)
{case:NOM, gender:M, number:SG}

giriṣṭhā́ḥ ← giriṣṭhā́- (nominal stem)
{case:NOM, gender:M, number:SG}

kucaráḥ ← kucará- (nominal stem)
{case:NOM, gender:M, number:SG}

mr̥gáḥ ← mr̥gá- (nominal stem)
{case:NOM, gender:M, number:SG}

ná ← ná (invariable)
{}

triṣú ← trí- (nominal stem)
{case:LOC, gender:N, number:PL}

urúṣu ← urú- (nominal stem)
{case:LOC, gender:N, number:PL}

vikrámaṇeṣu ← vikrámaṇa- (nominal stem)
{case:LOC, gender:N, number:PL}

yásya ← yá- (pronoun)
{case:GEN, gender:M, number:SG}

adhikṣiyánti ← √kṣi- (root)
{number:PL, person:3, mood:IND, tense:PRS, voice:ACT}

bhúvanāni ← bhúvana- (nominal stem)
{case:NOM, gender:N, number:PL}

víśvā ← víśva- (nominal stem)
{case:NOM, gender:N, number:PL}
▼ पद-पाठः

Приди с Ангирасами, достойными жертвы!
О, Яма, радуйся здесь с Варупами!
Я призываю Вивасвата, кто отец тебе,
Когда (ты) сел на солому при этом жертвоприношении.

▼ अधिमन्त्रम् (VC)

- यमः
- यमः
- पादनिचृत्त्रिष्टुप्
- धैवतः

▼ ब्रह्ममुनि - पदार्थः

पदार्थान्वयभाषाः - (यज्ञियेभिः-वैरूपैः-अङ्गिरोभिः-यम-आगहि इह मादयस्व) यज्ञ के योग्य नानाविध सायं-प्रातः, अमावस्या, पूर्णिमा, आदि सन्धियों के मुहूर्तरूप कालावयवों के साथ हे समय ! तू प्राप्त हो और इस यज्ञ में हमको अपने लाभ से तृप्त कर (यः ते पिता तं विवस्वन्तं बर्हिष्या निषद्य-अस्मिन् यज्ञे हुवे) और जो तेरा पिता सूर्यदेव है, उसका भी मैं आसनोपविष्ट इस यज्ञ में आहुतिप्रदान द्वारा प्रयोग करता हूँ ॥५॥

▼ ब्रह्ममुनि - भावार्थः

भावार्थभाषाः - भिन्न-भिन्नपर्व दिवसों में जबकि सूर्यरश्मियाँ भी यज्ञ में संयुक्त हों, ऐसे स्थान पर पार्वण यज्ञ समयानुकूल बनाने के लिए करने चाहिये ॥५॥

▼ ब्रह्ममुनि - पदार्थः

पदार्थान्वयभाषाः - (यज्ञियेभिः-वैरूपैः-अङ्गिरोभिः-यम-आ गहि इह मादयस्व) यज्ञार्हैर्यज्ञयोग्यैर्विभिन्नरूपैरङ्गिरोभिः-सायम्प्रातरमावस्यापौर्णमास्यादि-सन्धि-समप्राणैः कालावयवैः सह हे समय ! त्वमागह्यागच्छ तथाऽऽगत्येहास्मिन् यज्ञेऽस्मान्मादयस्व तर्पय (यः-ते पिता तं विवस्वन्तं बर्हिष्या निषद्य-अस्मिन् यज्ञे हुवे) यश्च ते पिता विवस्वान् सूर्योऽस्ति तमहमासनमुपविश्योपविष्टः सन्नस्मिन् क्रियमाणे यज्ञे हुवे-आहुतिप्रदानेनाददे युनज्मि। ‘अत्र हु धातुरादानार्थः’ “हु दानादनयोरादाने च” [जुहोत्यादिः] ॥५॥

अ॑ङ्गिरसो नः पित॑रो न॑वग्वा
अ॑थर्वाणो भृ॑गवः सोमिया॑सः
ते॑षां वयं॑ सुमतउ॑ यज्ञि॑यानाम्
अ॑पि भद्रे॑ सौमनसे॑ सियाम

अङ्गि॑रसो नः पि॒तरो॒ नव॑ग्वा॒ अथ॑र्वाणो॒ भृग॑वः सो॒म्यासः॑ ।
तेषां॑ व॒यं सु॑म॒तौ य॒ज्ञिया॑ना॒मपि॑ भ॒द्रे सौमन॒से स्या॑म ॥

▼ अधिमन्त्रम् - sa

- देवता - लिङ्गोक्तदेवताः
- ऋषिः - यमः
- छन्दः - त्रिष्टुप्

▼ Thomson & Solcum

अ॑ङ्गिरसो नः पित॑रो न॑वग्वा
अ॑थर्वाणो भृ॑गवः सोमिया॑सः
ते॑षां वयं॑ सुमतउ॑ यज्ञि॑यानाम्
अ॑पि भद्रे॑ सौमनसे॑ सियाम

▼ Vedaweb annotation

Strata
Popular for linguistic reasons, and possibly also for non-linguistic reasons

---

Pāda-label
popular
popular
popular
popular;; repeated line

Morph
áṅgirasaḥ ← áṅgiras- (nominal stem)
{case:NOM, gender:M, number:PL}

naḥ ← ahám (pronoun)
{case:ACC, number:PL}

návagvāḥ ← návagva- (nominal stem)
{case:NOM, gender:M, number:PL}

pitáraḥ ← pitár- (nominal stem)
{case:NOM, gender:M, number:PL}

átharvāṇaḥ ← átharvan- (nominal stem)
{case:NOM, gender:M, number:PL}

bhŕ̥gavaḥ ← bhŕ̥gu- (nominal stem)
{case:NOM, gender:M, number:PL}

somyā́saḥ ← somyá- (nominal stem)
{case:NOM, gender:M, number:PL}

sumataú ← sumatí- (nominal stem)
{case:LOC, gender:F, number:SG}

téṣām ← sá- ~ tá- (pronoun)
{case:GEN, gender:M, number:PL}

vayám ← ahám (pronoun)
{case:NOM, number:PL}

yajñíyānām ← yajñíya- (nominal stem)
{case:GEN, gender:M, number:PL}

ápi ← ápi (invariable)
{}

bhadré ← bhadrá- (nominal stem)
{case:LOC, gender:N, number:SG}

saumanasé ← saumanasá- (nominal stem)
{case:LOC, gender:N, number:SG}

syāma ← √as- 1 (root)
{number:PL, person:1, mood:OPT, tense:PRS, voice:ACT}

▼ पद-पाठः-तैत्तिरीयः

अङ्गिं॑रसः । न॒ः । पि॒तरः॑ । नवं॑ऽग्वाः । अथं॑र्वाणः । भृगं॑वः । सो॒म्यासः॑ ।
तेषां॑म् । व॒यम् । सु॒ऽम॒तौ । य॒ज्ञियां॑नाम् । अपिं॑ । भ॒द्रे । सौ॒म॒न॒से । स्या॒म॒ ॥

▼ Hellwig Grammar

- *aṅgiraso ← aṅgirasaḥ ← aṅgiras*
- [noun], nominative, plural, masculine
- “Aṅgiras; Aṅgiras; Brahman; Atharva-Veda; aṅgiras [word]; Aṅgiras.”

- *naḥ ← mad*
- [noun], genitive, plural

- “I; mine.”

- *pitaro* ← *pitaraḥ* ← *pitṛ*
- [noun], nominative, plural
- “father; Pitṛ; ancestor; parent; paternal ancestor; pitṛ [word]; forefather.”

- *navagvā* ← *navagvāḥ* ← *navagva*
- [noun], nominative, plural, masculine
- “Navagva.”

- *atharvāṇo* ← *atharvāṇaḥ* ← *atharvan*
- [noun], nominative, plural, masculine
- “Atharvan; Atharvavedin.”

- *bhṛgavaḥ* ← *bhṛgu*
- [noun], nominative, plural, masculine
- “Bhṛgu; precipice; Bhṛgu; Bhṛgu; Venus; bhṛgu [word].”

- *somyāsaḥ* ← *somya*
- [noun], nominative, plural, masculine
- “saumya.”

- *teṣāṃ* ← *teṣām* ← *tad*
- [noun], genitive, plural, masculine
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

- *vayaṃ* ← *vayam* ← *mad*
- [noun], nominative, plural

- “I; mine.”

- *sumatau* ← *sumati*
- [noun], locative, singular, feminine
- “benevolence; favor; Sumati.”

- *yajñiyānām* ← *yajñiya*
- [noun], genitive, plural, neuter
- “sacrificial; divine; devoted.”

- *api*
- [adverb]
- “besides; even; surely; though; furthermore; among; contrastingly; assuredly.”

- *bhadre* ← *bhadra*
- [noun], locative, singular, neuter
- “auspicious; lovely; good; happy; bhadra [word]; lucky; fine-looking; beautiful.”

- *saumanase* ← *saumanasa*
- [noun], locative, singular, neuter
- “favor; satisfaction.”

- *syāma* ← *as*
- [verb], plural, Present optative
- “be; exist; become; originate; happen; result; be; dwell; be born; stay; be; equal; exist; transform.”

▼ सायण-भाष्यम्

अङ्गिरसः अङ्गिरोनामकाः **अथर्वाणः** अथर्वनामकाः **भृगवः** भृगुनामकाश्च **नः** अस्माकं **पितरः** **नवग्वाः** अभिनवगमनयुक्ताः । सदा नूतनवत्प्रीतिजनका इत्यर्थः। ते च **सोम्यासः** । सोममर्हन्तीति सोम्याः । **यज्ञियानां** यज्ञार्हाणां **तेषां सुमतौ** अनुग्रहयुक्तायां बुद्धौ **वयं स्याम** सर्वदा तिष्ठेम । **अपि** च **सौमनसे भद्रे** सौमनसस्य कारणे कल्याणे फले स्याम सर्वदा तिष्ठेम ॥

▼ भट्टभास्कर-टीका

17अङ्गिर इति ॥ अङ्गिरसः पितृविशेषाः अस्माकं च पितरः **नवग्वाः** अभिनवागमनाः आगमने अभिनवा इव प्रियाः । क्विपि 'ऊङ् च गमादीनाम्' इत्यूकारः । आगमनमायातु उपसर्गयोस्स्वस्थानविनिमयः वा बहुव्रीहौ ।
नवग्वा अथर्वाणश्च भृगवश्च पितृविशेषाः प्रशस्ताः **सोम्यासः** सोमार्हाः येऽप्येवंविधा महानुभावाः पितरस्तेषां **यज्ञियानां** यज्ञार्हाणां **सुमतौ** शोभनायां मतौ सानुग्रहायां वयं स्याम भूयास्म । अपि च, **भद्रे** भजनीये कल्याणे **सौमनसे** सौमनस्यहेतुके तत्प्रदानहेतुके सर्वाभिमतसिद्धिरूपे कल्याणे च स्यामेति । येऽत्र अविनियुक्ता मन्त्राः ते लिङ्गेन क्वाप्यनुरूपे कर्मणि विनियोक्तव्याः ॥

▼ मानसतरङ्गिणीकृत्

The a~Ngirasas, the atharvANs, the bhR^igus, are our ancestors who performed the soma pouring, nine month rite;
may we be favored as these venerable ones and be auspiciously protected.

▼ Wilson

English translation:

“The **Aṅgirasas**, the **Atharvas**, the **Bhṛgus**, who are entitled to the **Soma**, are our recent progenitors;may we ever have a plural ce in the favour of these venerable (pitrṣ); may we be ever held in their auspiciousregard.”

Commentary by Sāyaṇa: Ṛgveda-bhāṣya

Our recent progenitors: navagvā = having recently arrived, or inspiring affliction, as something new;also applied to the three classes; or, navanīya, those condition is to be praised

▼ Jamison Brereton

The Aṅgirases, our forefathers, the Navagvas, the Atharvaṇas, the Bhr̥gus deserving of soma—
may we be in the favor of these who are deserving of the sacrifice;
may we be also in their propitious benevolence.

▼ Griffith

Our Fathers are Angirases, Navagvas, Atharvans, Bhrgus who deserve the Soma.
May these, the Holy, look on us with favour, may we enjoy their gracious loving-kindness.

▼ Macdonell

The Aṅgiras, our fathers, the Navagvas, The Bhṛgus and Atharvans, Soma-loving: May we abide for ever in the favour And the good graces of those holy sages.

▼ Geldner

Unsere Väter, die Angiras, die Navagva´s, die Atharvan´s, Bhrigu´s, die Somawürdigen - in der Gunst dieser Opferwürdigen und in ihrem glückbringenden Wohlwollen möchten wir sein.

▼ Grassmann

Die Angiras, die Neuner, und die Väter, die Feuerpriester und die frommen Bhrigu's, Sie mögen fest in ihrer Huld uns halten, die heiligen im Segen ihrer Liebe.

▼ Elizarenkova

Ангирасы – наши отцы, Навагва,
Атхарваны, Бхригу, достойные Сомы,
Да будем мы в милости у них, достойных жертвы,
И в добром (их) расположении!

▼ अधिमन्त्रम् (VC)

- लिङ्गोक्ताः
- यमः
- विराट्त्रिष्टुप्
- धैवतः

▼ ब्रह्ममुनि - पदार्थः

पदार्थान्वयभाषाः - (अङ्गिरसः पितरः-नवग्वाः-अथर्वाणः) ग्रीष्म ऋतु सम्बन्धी सूर्यरश्मियाँ वर्षाऋतु सम्बन्धी सूर्यकिरणों, शरदृतु संबन्धी भानुरश्मियाँ, हेमन्तऋतु संबन्धी दिवाकर किरणें, शिशिरऋतु संबन्धी सूर्यरश्मियाँ, वसन्तऋतु संबन्धी आदित्यकिरणें, हमारे जीवन के लिये हैं (तेषां यज्ञियानां सुमतौ भद्रे-अपि सौमनसे वयं स्याम) उन यज्ञयोग्य सूर्यकिरणों के विचारणीय विज्ञानव्यवहार में हम कल्याण मन से सुखयुक्त होकर रहें ॥६॥ प्रत्येक ऋतु को स्वानुकुल और सुखमय बनाने के लिए पुष्कल ऋतुयोग करने चाहियें ॥६॥

▼ ब्रह्ममुनि - पदार्थः

पदार्थान्वयभाषाः - (अङ्गिरसः पितरः नवग्वाः-अथर्वाणः-भृगवः सोम्यास-नः) अङ्गिरसः-ग्रीष्मर्तुसम्बन्धिसूर्यरश्मयः, पितरः वर्षर्तुसम्बन्धिरविकिरणाः, नवग्वः-शरदृतुसम्बन्धिभानुरश्मयः, अथर्वाणः-हेमन्तर्तुसम्बन्धिरवि-किरणाः, भृगवः शिशिरर्तुसम्बन्धिसूर्यरश्मयः, सोम्यासः-वसन्तर्तु- सम्बन्धिसूर्यकिरणाः, नः-अस्मभ्यं जीवनाय सन्ति। पूर्वस्मिन्मन्त्रे 'विवस्वन्तं हुवे' इति वचनात् तेन विवस्वता साकमृतवस्तत्सहिताः सूर्यरश्मयश्चापि युज्यन्त इति दर्शयितुमङ्गिरःप्रभृतीनां वचनम्। अन्यत्रापि-"आयातु मित्र ऋतुभिः कल्पमानः संवेशयन् पृथिवीमुस्रियाभिः" [अथ०३।८।१] सूर्यः, ऋतुभिरुस्रियाभिश्च सह आयातीति सिद्धान्तः। अत्र तु ते रश्मय ऋतुसहचरिता वर्णिताः सन्ति। एवंवच्च विज्ञानम्। "वीळु चिद् दृढा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण। चक्रुर्दिवो बृहती गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः" [ऋ०१।१।२] अत्रापि दर्शितं यदङ्गिरसो ग्रीष्मर्तुसम्बन्धिनः सूर्यरश्मयोऽद्रिं मेघं चक्रुः कृतवन्तस्तमेवाद्रिं मेघं पितरो वर्षर्तुसम्बन्धिरविकिरणा रुजन् भञ्जयन्ति नीचैर्निपातयन्ति पुनश्चोस्रा विविधगुणवासयितारः शारदाः सूर्यकिरणा आदित्यं दिनं पृथिवीं प्राप्नुवन्ति, एवमृतुसाम्यं दर्शितम्। ऋतुत्रयत्वमपि भवति यथा चरके-"विकृतास्त्वेनं महता विपर्ययेणोपपादयन्ति, ऋतवस्त्रय इव" [चरके १२।१३] तथा कृत्वैवात्र पितर इति शब्दो न विशेषणरूपेणापित्वङ्गिरआदिवद्देवतारूपेण स्वतन्त्र एव। सायणेन 'पितरो नवग्वाः सोम्यासः' त्रयोऽप्यङ्गिरआदीनां विशेषणवाचकाः सन्तीति व्याख्यातं परन्तु सूक्तभाष्यावतरणे "अङ्गिरसो नः पितरो नवग्वा इति षष्ठ्या अङ्गिरःपित्रथर्वभृगुलक्षणा लिङ्गोक्ता देवताः" एवमत्र तु सायणेन 'पितरः' इति शब्दस्य देवतात्वं प्रतिपादितम्। अस्तु, निरुक्तेऽप्यस्मद्वत् पितर इत्यस्य स्वतन्त्रं देवतात्वमेव प्रतिपादितमङ्गिरआदीनामर्थाश्च यथा–"पिता पाता वा पालयिता वा......पिता दुहितुर्गर्भं दधाति पर्जन्यः पृथिव्याः" [निरु०४।२१] इति लक्ष्यीकृत्योक्तमत्र "पितरो व्याख्याताः। अङ्गारेष्वङ्गिराः अर्चिषि भृगुः संबभूव" इति कृत्वैवोक्तं यास्केन। "अङ्गिरसो व्याख्याताः, भृगवो

व्याख्याताः, अथर्वाणोऽथर्वन्तः, थर्वतिश्चरतिकर्मा तत्प्रतिषेधः। तेषामेषा साधारणा भवति-'अङ्गिरसो नः पितरो.........।' अङ्गिरसो नः पितरो नवगतयो नवनीतगतयो वाथर्वाणो भृगवः सोम्याः सोमसम्पादिनः" [निरु०११।१९] "रसः सोमः" [श०७।३।१।३] सोम्यासः सोमसम्पादिनो रससम्पादिनो वसन्तर्तुसम्बन्धिसूर्यरश्मय इत्यर्थः। एवं नात्राङ्गिरआदयो मृतपितरोऽपि तु सन्ति देवा ऋतुयुक्तसूर्यरश्मयः। उक्तं च निरुक्ते 'पितर' इत्याख्यानम्। "माध्यमिको देवगण इति नैरुक्ताः" [निरु०११।९९] रश्मयो देवाः-"उदिता देवाः सूर्यस्य" (तेषां यज्ञियानां सुमतौ भद्रे-अपि सौमनसे वयं स्याम) "तेषां यज्ञियानां सुमतौ कल्याण्यां मतौ भद्रे भन्दनीये भाजनवति वा कल्याणे मनसि स्याम" [निरु०११।१९] तेषां पूर्वोक्तानां यज्ञार्हाणां सुमन्तव्ये व्यवहारे भाजनवति कल्याणे मनसि सुखयुक्ते प्रसन्नभावे वर्तेमहि ॥६॥

१२. सोमभक्ष-मन्त्राः②

सोमभक्षमन्त्राः (तै. सं. ३-२-५)

▼ विश्वास-प्रस्तुतिः

आ॒पूर्या॑स् स्थ,
+आ मा॑ पूरयत प्र॒जया॑ च॒ धने॑न च ।

▼ विश्वास-प्रस्तुतिः

ए॒तत् ते॑ तत॒ ये च॒ त्वाम् अनु॑।
[ए॒तत् ते॑] पितामह [ये च॒ त्वाम् अनु॑]।
[ए॒तत् ते॑] प्रपितामह॒ [ये च॒ त्वाम् अनु॑]।
अत्र॑ पितरो यथाभा॒गम्मं॑न्दध्वम् ।

▼ Keith

This for thee, O father, and for thy line;
This for thee, O grandfather, great-grandfather, and for thy line

▼ भट्टभास्कर-टीका

एनदन्नं ते तव भवतु हे तत तात ।
ये च त्वामनुगता आश्रिताः अन्ये, तेषाञ्चैतदन्नं भवतु । एतत्ते अन्नं हे पितामह, ये च त्वामनुगताः तेषां च । पितुः पिता पितामहः । एवमेतत्ते अन्नं हे प्रपितामह, ये चान्ये त्वामनुगताः, तेषाञ्च । पितामहस्य पिता प्रपितामहः ।

हे तत तात एतदशनं तव ये चान्ये त्वामनुगताः । एतत्ते पितामह, ये च त्वामनुगताः । एतत्ते प्रपितामह, ये च त्वामनुगताः ।

▼ विश्वास-प्रस्तुतिः

अत्र॑ पितरो यथाभा॒गम् म॑न्दध्वम् ।

▼ Keith

Do ye Pitrs rejoice in your portions.

Rejoice therein, O fathers, according to your shares.

▼ भट्टभास्कर-टीका

अधुना सर्वेपि सामान्येनोच्यन्ते । अत्र अस्मिन् कर्मणि हे पितरः पातारः पितृप्रभृतयो वा पितृपितामहप्रपितामहाः यथाभागं योयो यस्य भागः तेनतेन । 'यथाऽसादृश्ये' इत्यव्ययीभावः । यूयं मन्दध्वं मोदध्वम् । मदि स्तुतिमोदमदस्वप्नगतिषु ॥

▼ भास्करोक्त-विनियोगः

18षड्भिर्नमस्कारैरुपतिष्ठते - नमो व इति ॥

▼ विश्वास-प्रस्तुतिः

नमो॑ व॒ पितरो॒ रसा॑य । [पित॑रो॒ नमो॑ वः।],

▼ Keith

Homage to your taste, O fathers;

▼ भट्टभास्कर-टीका

हे पितरः युष्मभ्यं नमः नमस्करोमि रसाय रसार्थं रसवान् भूयासमिति । 'पितरो नमो वः' इत्यादिकं षट्स्वप्यजुषज्यते ।

▼ विश्वास-प्रस्तुतिः

नमो॑ व॒ पितर॒श् शुष्मा॑य *(पित॑रो॒ नमो॑ वः)*,,

▼ Keith

homage to your birth, O fathers;

▼ भट्टभास्कर-टीका

शुष्मो बलम् ।

▼ विश्वास-प्रस्तुतिः

नमो॑ व॒ पितरो जी॒वाय । [पित॑रो॒ नमो॑ वः।],

▼ Keith

homage to your life, O fathers;

▼ भट्टभास्कर-टीका

जीवः प्राणः ।

▼ विश्वास-प्रस्तुतिः

नमो॑ व॒ पि॒त॒र॒स् स्व॒धायै॑ । [पित॑रो॒ नमो॑ वः।],,

▼ Keith

homage to your [5] custom, O fathers;

▼ भट्टभास्कर-टीका

स्वधा अन्नम् ।

▼ विश्वास-प्रस्तुतिः

नमो॑ व॒ पितरो म॒न्यवे॑ । [पित॑रो॒ नमो॑ वः।],,

▼ Keith

homage to your anger, O fathers;

▼ भट्टभास्कर-टीका

मन्युर्दीप्तिः, क्रोधो वा ।

▼ विश्वास-प्रस्तुतिः

नमो॑ वꣳ पितरो घो॒राय॑ ,
पित॑रो॒ नमो॑ वः ।

▼ Keith

homage to your terrors, O fathers; O fathers, homage to you.

▼ भट्टभास्कर-टीका

घोरः क्रूरम् । एतयोः स्थाने प्राधान्यं प्रार्थ्यते । हे पितरः युष्मभ्यं नमः । फलमनपेक्ष्य सप्तमोयं नमस्कारः क्रियते । पुनर्वचनं फलनिरपेक्षया नमस्कारार्थम् । अन्य आहुः - पितृसंबन्धिभ्यो रसादिभ्यः प्रथमं षण्णमस्काराः, ततः पितृभ्य एव सप्तम इति ।

▼ विश्वास-प्रस्तुतिः

य ए॒तस्मि॑ल्ँ लो॒के स्थ यु॒ष्माँस्तेऽनु॑ ।

▼ Keith

Ye that are in that world, may they follow you;

▼ भट्टभास्कर-टीका

ये एतस्मिन् लोके पितरः स्थ । एतस्मिन्निति पितृलोकं व्यपदिशति । स्थेति सर्वपित्रभिप्रायेणोक्तम् । ते सर्वे युष्माननुसन्तु युष्मत्प्रधाना भवन्तु । 'हीने' इत्यनोः कर्मप्रवचनीयत्वम् । युष्मानिति पित्रादित्रयं व्यपदिशति ।

▼ विश्वास-प्रस्तुतिः

येँऽस्मि॑ल्ँ लो॒के मान् तेऽनु॑ ।

▼ Keith

ye that are in this world, may they follow me.

▼ भट्टभास्कर-टीका

अस्मिन् मनुष्यलोके मनुष्याः स्थ, ते सर्वे मामनु सन्तु मत्प्रधाना भवन्तु ।

▼ विश्वास-प्रस्तुतिः

य ए॒तस्मि॑ल्ँ लो॒के स्थ यू॒यन् तेषाव्ँ॒ वसि॑ष्ठा भूयास्त ।

▼ Keith

Ye that are in that world, of them be ye the most fortunate;

▼ भट्टभास्कर-टीका

ये यूयमेतस्मिन् लोके स्थ तेषां पितॄणां यूयं वसिष्ठाः वसुमत्तमा भूयास्त ।

▼ विश्वास-प्रस्तुतिः

येऽस्मिँल् लो॒कें ऽहन् तेषाव्॒वसिंष्ठो भूयासम् ।

▼ Keith

ye that are in this world, of these may I be the most fortunate.

▼ भट्टभास्कर-टीका

येऽस्मिन् लोके सन्ति मनुष्यास्तेषां मनुष्याणामहं वसिष्ठो वसुमत्तमो भूयासम् । वसुशब्दादिष्ठनि 'विन्मतोर्लुक्' इति लुक्, 'टेः' इति टिलोपः ॥

प्र॑जापते न॑ त्व॑द् *(विश्वा जातानि→)* एता॑न्य् अन्यो॑
वि॑श्वा जाता॑नि **प॑रि** ता॑ **बभूव** ।
य॑त्-कामास् ते जुहुम॑स् त॑न् नो **अस्तु**
वयँ॑ **स्याम** प॑तयो रयीणा॑म्॥

▼ भास्करोक्त-विनियोगः

20-22शकलैश् चरन्ति - देवकृतस्येति ॥

▼ विश्वास-प्रस्तुतिः

दे॒वकृं॑त॒स्यैनं॑सो **ऽव॒यजं॑नम् असि** ।
म॒नु॒ष्यं॑कृतस्यैनं॑सोऽव॒यजं॑नमसि ।
पि॒तृकृं॑त॒स्यैनं॑सोऽव॒यजं॑नमसि ।

▼ Keith

Thou art the expiation of sin committed by the gods, thou art the expiation of sin committed by men, thou art the expiation of sin committed by the fathers.

▼ भट्टभास्कर-टीका

देवादिविषये यदस्माभिः कृतमेनः अधर्मः तस्यावयजनं नाशनं असि । 'क्षेपे' इति सप्तम्यास्समासः, सप्तमीपूर्वपदप्रकृतिस्वरत्वम् । यद्वा - देवादिभिरस्मद्विषये, यत्कृतमेनःफलं दुखं तस्यावयजनमसि । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्ववम् । एतेनोभे व्याख्याते ॥

▼ भास्करोक्त-विनियोगः

23अथावभृथभक्षमन्त्रः - अप्सु धौतस्येत्यादि ॥

▼ विश्वास-प्रस्तुतिः

अ॒प्सु **धौ॒तस्य॑** सोम देव ते॒
नृभि॑स् **सु॒तस्य॑**+
इ॒ष्ट-य॑जुषस् **स्तु॒त**-स्तो॑मस्य श॒स्तोक्थ॑स्य॒
यो भ॒क्षो अ॑श्व॒-सनि॒र् यो गो॒-सनि॒स्
तस्य॑ ते पि॒तृभि॑र् **भ॒क्षङ् कृ॑त॒स्योप॑हूत॒स्योप॑हूतो भक्षयामि** ॥

▼ Keith

Of thee, O god Soma, that art purified in the waters, that art pressed by men, over whom the Yajus is spoken, the Stoma sung, the Śastra recited, who art made by the fathers into food to win horses and cows, and who art invited, I invited eat.

▼ भट्टभास्कर-टीका

अप्सु धौतस्य प्रक्षालितस्य नृभिः मनुष्यैः चेतनैः अभिषुतस्य ।

इष्टयजुष इत्यादि । व्याख्यातम् ।
(**इष्टयजुषः** अध्वर्युभिर्यज्ञे इष्टानि विनियुक्तानि सर्वाणि यजूंषि प्रायोगत्वत्संस्कारार्थानीति इष्टयजुष्ट्वम् ।
स्तुतस्तोमस्य उद्गातृभिश्च स्तुतास्सोमाः स्तोत्राणि त्वदर्थमिति स्तुतस्तोमत्वम् ।
शस्तोक्थस्य होतृभिश्शस्तान्युक्थानि शस्त्राणि त्वदर्थमिति शस्तोक्थत्वम् ।)

हे सोम देव तवेदृशस्य यो भक्षः भक्षणं अश्वसनिः अश्वानां संभक्ता । यो गोसनिः गवां संभक्ता । 'छन्दसि वनसन' इतीन्प्रत्ययः । तस्य ते तव पितृभिः भक्षंकृतस्य । 'च्वौ' इतीत्वापवादः पूर्वपदस्य छान्दसो मुमागमः, 'ऊर्यादिच्विडाचश्च' इति गतित्वात् 'गतिरन्तरः' इति तस्य प्रकृतिस्वरत्वम् ।

उपहूतस्येत्यादि । गतम् ॥ (**उपहूतस्य** इन्द्रादिभिरनुज्ञातस्य ईदृशस्य तव अहं **उपहूतः** देवैस्सहभक्षिभिरनुज्ञातः **भक्षयामि** ।)

इति तृतीये द्वितीये पञ्चमोनुवाकः ॥

[[149]]

१३. एकविंशतिरात्रः②

१३. एकविंशतिरात्रः (तै. सं. ७-३-१०)

परिचयः⑥

- अतिरात्रः
- पृष्ठ्यष्षडहः
- परस्-सामानस् त्रयः
- विषूवान् दिवाकीर्त्यम्
- आवृत्ताः परस्-सामानः प्रतीचीनास् त्रयः
- पृष्ठ्यष् षडहः
- अतिरात्रः

फलम्⑥

▼ विश्वास-प्रस्तुतिः

अ॒साव् आ॑दि॒त्यो॑ ऽस्मिँल् लो॒क आ॑सीत् ।
तन् दे॒वाᳲ पृ॒ष्ठैᳲ *(षड्भिरहोभिः)* प॑रि॒गृह्य॑ सुव॒र्गलँ् लो॒कम् अ॑गमयन् ।
परै॑र् *(त्रिभिरहोभिः)* अ॒वस्ता॒त्*(=पृष्ठतः)* पर्य॑गृह्णन्।
दिवाकी॒र्त्ये॑न *(विषुव-प्रातर्-गीयमानेन साम्ना)* सुव॒र्गे लो॒के प्रत्य॑स्थापय॒न् ।
परैः॑ *(त्रिभिरहोभिः)* प॒रस्ता॒त् पर्य॑गृह्णन् *(अवतरणात् प्राक्)*।
पृ॒ष्ठैर् *(षड्भिरहोभिः)* उ॒पावा॑रोहन् ।
स वा अ॒साव् आ॑दि॒त्यो॑ ऽमुष्मिँल् लो॒के परै॑र् उभ॒यत॒ᳲ परि॑गृहीतः ।

▼ विश्वास-प्रस्तुतिः

यत् पृ॒ष्ठानि॒ *(षडहगतानि)* भव॑न्ति , सु॒व॒र्गम् ए॒व तैर् लो॒कयँ॑ यज॑माना यन्ति ।
परै॑र् *(त्रिभिरहोभिः)* अ॒वस्ता॒त् परि॑ गृह्णन्ति *(आरोहणात् प्राक्)*। दि॒वा॒की॒र्त्ये॑न *(विषुव-प्रातर्-गीयमानेन साम्ना)* सु॒व॒र्गे लो॒के प्रति॑ तिष्ठन्ति । [25]
परैः॑ *(त्रिभिरहोभिः)* प॒रस्ता॒त् परि॑गृह्णन्ति *(अवतरणात् प्राक्)*।
पृ॒ष्ठैर् *(षड्भिरहोभिः)* उ॒पाव॑रोहन्ति ।

▼ विश्वास-प्रस्तुतिः

यत् परे॑ *(त्रीण्य् अहानि +उत्तरार्धे)* प॒रस्ता॒न् न स्यु॒ः, परा॑ञ्चस् *(उपरि)* सुव॒र्गाल् लो॒कान् निष्प॑द्येर॒न् *(अतिवर्तित्वात्)*।
यद् *(त्रीण्य् अहानि +पूर्वार्धे)* अ॒वस्ता॒न् न स्यु॒ः, प्र॒जा *(पृथिवीस्थानं च)* निर् द॑हेयुः *(अतिवर्तित्वात्)*।

▼ विश्वास-प्रस्तुतिः

अ॒भितो॑ दिवाकी॒र्त्य॑म् *(त्र्यहोभ्यां)* पर॑स्-सामानो भवन्ति ।
(स्वर्गस्थितान् आदित्यादिदेवान्) सुव॒र्ग ए॒वैनाल्ँ॑ लो॒क उ॑भ॒यत॒ः परि॑ गृह्णन्ति *(आरोहणावरोहण-कालयोः)*।

▼ विश्वास-प्रस्तुतिः

यज॑माना॒ वै दि॑वाकी॒र्त्य॑म्*(→विषुवन्तम्)* । *(विषुवस्थानयोर् मध्ये वर्तमावाभ्यां खचक्रार्धाभ्यां युक्तः)*
सव्ँ॒व॒त्स॒रः॒ पर॑स्सामानः ।
अ॒भितो॑ दिवाकी॒र्त्य॑म् पर॑स्सामानो भवन्ति ।
सव्ँ॒व॒त्स॒र ए॒वोभ॒यत॒ः प्रति॑ तिष्ठन्ति ।[26]

▼ विश्वास-प्रस्तुतिः

पृ॒ष्ठव्ँ॑ वै दि॑वाकी॒र्त्य॑म् *(साम)*, पा॒र्श्वे पर॑स्सामानः ।
अ॒भितो॑ दिवाकी॒र्त्य॑म् पर॑स्सामानो भवन्ति ।
तस्मा॑द् अ॒भित॒ः॑ पृ॒ष्ठम् पा॒र्श्वे *(प्रजानाम्)*।

ग्रहविचारः⑥

▼ विश्वास-प्रस्तुतिः

भूयिष्ठा ग्रहा गृह्यन्ते । भूयिष्ठँ शस्यते ।
यज्ञस्यैव तन् मध्यतो ग्रन्थङ् ग्रथ्नन्त्य् अविस्रँसाय ।
▼ विश्वास-प्रस्तुतिः

(त्रिषु परस्सामसु त्रीन् अतिग्राह्यान् गृह्णाति 'उपयामगृहीतोस्यद्भ्यस्त्वौषधीम्यः' इत्यादिभिः त्रिभिः, तान् ऊर्ध्वान् आवृत्तांश् च विषूवति । तेषां मध्ये सूर्यमुदुत्यं जातवेदसमिति ।)
(ततः -) सप्त गृह्यन्ते ।
सप्त वै शीर्षण्याः प्राणाः *(=रन्ध्राणि)* ।
प्राणान् एव यजमानेषु दधति ।

▼ विश्वास-प्रस्तुतिः

यत् पराचीनानि पृष्ठानि भवन्ति , अमुम् एव तैर् लोकम् अभ्यारोहन्ति ।
यद् इमलँ लोकन् न प्रत्यवरोहेयुर्, उद् वा माद्येयुर्, यजमाना᳚ प्र वा मीयेरन् ।

▼ विश्वास-प्रस्तुतिः

यत् प्रतीचीनानि पृष्ठानि भवन्ति-
इमम् एव तैर् लोकम् प्रत्यवरोहन्ति ।
अथो अस्मिन्न् एव लोके प्रति तिष्ठन्त्य् अनुन्मादाय ।

फलम्⑥

▼ विश्वास-प्रस्तुतिः

इन्द्रो वा अप्रतिष्ठित आसीत् ।
स प्रजापतिम् उपाधावत् ।
तस्मा एतम् एकविँशति-रात्रम् प्रायच्छत् ।
तम् आहरत् । तेनायजत ।
ततो वै स प्रत्यतिष्ठत् ।

▼ विश्वास-प्रस्तुतिः

ये बहुयाजिनो ऽप्रतिष्ठितास् स्युस्, [28] त एकविँशतिरात्रम् आसीरन् ।
द्वादश मासा᳚, पञ्चर्तवस्, त्रय इमे लोका, असाव् आदित्य एकविँशः ।
एतावन्तो वै देवलोकाः ।
तेष्वेव यथापूर्वम् प्रति तिष्ठन्ति ।

▼ विश्वास-प्रस्तुतिः

अ॒साव् आ॑दि॒त्यो न व्य॑रोचत ।
स प्र॒जाप॑ति॒म् उपा॑धावत्।
तस्मा॑ ए॒तम् ए॑कविँ॒शतिरा॒त्रम् प्राय॑च्छत ।
तम् आह॑रत । तेना॑यजत ।
तत॒ो वै सो॑ऽरोचत ।
य ए॒वव्ँ वि॒द्वाँस एकविँ॒शतिरा॒त्रम् आस॑ते॒ , रोच॑न्त ए॒व ।

▼ विश्वास-प्रस्तुतिः

ए॒क॒विँ॒श॒ति॒रा॒त्रो भ॑वति । रुग् वा ए॑क-विँ॒शः । रुच॑म् ए॒व ग॑च्छ॒न्त्य् अथो॑ प्रति॒ष्ठाम् ए॒व । प्र॑ति॒ष्ठा ह्य् ए॑कविँ॒शः ।

▼ विश्वास-प्रस्तुतिः

अ॒ति॒रा॒त्राव॒भितो॑ भवतो, ब्रह्मवर्च॒सस्य॒ परि॑गृहीत्यै ॥ [29]

१४. संवत्सरसत्र-मन्त्राः②

१४. संवत्सर सत्र मन्त्राः (तै. ब्रा. १-२-३)

ग्रहप्रामुख्यम्⑥

▼ विश्वास-प्रस्तुतिः

(संवत्सर-पक्षयोस्) सन्त॑ति॒र् वा ए॒ते *(विषूवति गृह्यमाणा)* ग्रहा॒
यत् पर॑स्-सामानः ।
(कुत इति चेत् -) वि॒षू॒वान् *(=पक्षद्वयवान्)* दि॑वा-की॒र्त्य॑म् *(दिनम्)*।

▼ भट्टभास्कर-टीका

1 सन्ततिर्वा इत्यादि ॥
सन्ततिः सन्तननम् । तादर्थ्यात्ताच्छब्द्यम् ।
पूर्वोत्तरयोः पक्षयोर् विषुवति सन्तानार्था **एते ग्रहाः ये परस्सामानः**,
तात्स्थ्यात् ताच्छब्द्यं 'मञ्चाः क्रोशन्ति'इतिवत् ।
परस् सामदिवसेषु गृह्यमाणा अतिग्राह्याः **ग्रहाः** ते सन्तननार्थाः सन्ततरज्जुस्थानीया इति ।

ग्रह-रूपत्वात् **दिवाकीर्त्यं** यद् अहः
तत् विषूवान् -
विष्वङ् नाना पक्ष-द्वयावलम्बिनी स्थितिर् अस्येति **विषुवान्**
वंश-काष्ठ-स्थानीयो दिवसो मध्यमः, एतेन सन्तत्य्-अपेक्षा दर्शिता ।
▼ विश्वास-प्रस्तुतिः

यथा॒ शाला॑यै॒ पक्षा॑स्य॒,
ए॒वँ स॒वँ॒वत्स॒रस्य॒ पक्षा॑सी ।

▼ भट्टभास्कर-टीका

इदानीं तामेव सन्ततिं दर्शयितुं सन्तन्यमानं दर्शयति - यथेति । शालायाः पक्षाविव पक्षस्थानीयौ संवत्सरस्य पक्षौ ।

▼ विश्वास-प्रस्तुतिः

यद् ए॒ते न गृ॒ह्ये॒र॒न्न्
विषू॑ची *(=विष्वग्-गमने)* स॒वँ॒वत्स॒रस्य॒ पक्षा॑सी॒ व्य्-अव॑स्रँसेयाताम् ।

▼ भट्टभास्कर-टीका

तत्र यद्य् अतिग्राह्याः सन्तनन-रज्जु-स्थानीया न गृह्येरन्
ततो **विषूची** विष्वगगमने संवत्सरस्य पक्षसी **व्यवस्रंसेयातां** भिन्नदिक्के पतिते स्याताम् ।

▼ विश्वास-प्रस्तुतिः

आर्ति॒म् आर्च्छे॑युः ।

▼ भट्टभास्कर-टीका

ततश्च आर्तिं गच्छेयुः यजमानाः कर्मनाशात् ।

▼ विश्वास-प्रस्तुतिः

यद् ए॒ते गृ॒ह्यन्ते॒ ,
यथा॒ शाला॑यै॒ प॑क्षसी मध्य॒मवँ॒ वँ॒शम् अ॒भि-स॑म॒ायच्छ॑त्य्
ए॒वँ स॒वँ॒वत्स॒रस्य॒ पक्षा॑सी दिवा-की॒र्त्य॑म् अ॒भि-सन्त॑न्वन्ति ।

▼ भट्टभास्कर-टीका

एषां तु ग्रहणे शालायाः पक्षौ मध्यमं वंशमभिसमायच्छति लौकिक इव । संवत्सरस्य पक्षसी दिवाकीर्त्यमभिसन्तन्वन्ति आभिमुख्येनानीय आबध्नन्ति वंश इव दिवाकीर्त्ये सत्रिणः ।

▼ विश्वास-प्रस्तुतिः

नार्ति॒म् आर्च्छ॑न्ति ।

▼ भट्टभास्कर-टीका

ततो नार्तिं गच्छन्ति ॥

स्तोमाः⑥

▼ विश्वास-प्रस्तुतिः

(स्तोमसङ्ख्यया) ए॒क॒-वि॒ꣳशम् अह॑र् भवति ।

▼ भट्टभास्कर-टीका

2 एतच्च अहर् एकविंशं एकविंशस्तोमकं भवति ।

ग्रहा ऽतिग्राह्याश् च⑥

▼ विश्वास-प्रस्तुतिः

शु॒क्राग्रा॒ ग्रहा॑ गृह्यन्ते॒ - प्रत्य् उत्त॑ब्ध्यै, सयु॒त्वाय॑*(←षिङ् बन्धने)* ।

▼ भट्टभास्कर-टीका

प्रत्युत्तब्ध्यै प्रत्युत्तम्भनाय वंशकाष्ठस्थानीयस्य उच्छ्रितावस्थानाय प्रतिष्ठात्वाद् एकविंशस्य ।
शुक्राग्रा ग्रहा गृह्यन्ते।
सयत्वाय संश्लिष्यमाणत्वाय स्थाने शुक्रप्राधान्यात् संजज्ञानेरबन्धता(??) यथा स्यादिति ।
उत्तानास्यः **सयः**; षिङ् बन्धने पचाद्यजन्तात् भावप्रत्ययः ।

सौर्योऽतिग्राह्यः⑥

▼ विश्वास-प्रस्तुतिः

सौ॒र्यं॑ ए॒तद्-अह॑ऽ॰ प॒शुर् आल॑भ्यते ।
सौ॒र्यो॑ ऽति-ग्रा॒ह्यो॑ गृह्यते *(सप्तमः)* ।
अह॑र् ए॒व रू॒पेण॒ सम॑र्धयन्ति ।

▼ भट्टभास्कर-टीका

सौर्य इत्यादि । पश्वतिग्राह्ययोस्सौर्यत्वेन सूर्यसम्बन्धादह्नो रूपसमृद्धिर्भवति । दिवाकीर्त्यत्वं समृद्धं भवति । उभयत्रापि छन्दसमन्तस्वरितत्वम् ॥

▼ विश्वास-प्रस्तुतिः

अथो॒ अह्न॑ ए॒वैष ब॒लिर् ह्रि॑यते ।

▼ भट्टभास्कर-टीका

अथो अपिच एषोऽह्नो बलिर्ह्रियते पूजा क्रियते, योऽयं सप्तमः सौर्योऽतिग्राह्यः ॥

सप्तत्वम्⑥

▼ विश्वास-प्रस्तुतिः

स॒प्त+ एतद्-अह॑र् अति-ग्रा॒ह्या॑ गृह्यन्ते ॥34॥

▼ भट्टभास्कर-टीका

3 अस्मिन् अह्नि सप्तातिग्राह्या गृह्यन्ते ये परस्सामसम्बन्धिनः त्रयः पूर्वे त्रय उत्तरे तेपां मध्ये सौर्य इति सप्तास्मिन्नह्नि गृह्यन्ते ।

▼ विश्वास-प्रस्तुतिः

(चक्षुःश्रोत्र-नासिकास्य-सङ्ख्यया) स॒प्त वै शी॑र्ष॒ण्या॑ऽ॰ प्रा॒णाः ।
अ॒साव् आ॑दि॒त्यश् शिर॑ऽ॰ प्र॒जाना॑म् ।

▼ भट्टभास्कर-टीका

सप्त वा इत्यादि । द्वे चक्षुषी द्वे श्रोत्रे द्वे नासिके एकमास्यमिति ।*(5)*
आदित्यश् शिरस्-स्थानीयः प्रजानाम् उच्छ्रितत्वात्,

एकविंशश् च ज्योतिः तेषां स्तोमानाम् उच्छ्रितः ।
▼ विश्वास-प्रस्तुतिः

शी॒र्षन्न्*(=शिरसि)* ए॒व प्र॒जाना॑म् प्रा॒णान् द॑धाति ।
तस्मा॑थ् *(सप्तातिग्राह्य-ग्रहणात्)* स॒प्त शी॒र्षन्*(=शिरसि)* प्रा॒णाः ।

▼ भट्टभास्कर-टीका

तस्माद् एकविंशे दिवाकीर्त्ये सप्तातिग्राह्य-ग्रहणात्
प्रजानां शिरसि **सप्त प्राणान् दधाति** स्थापयति
अत एव शिरसि सप्त प्राणाः ॥

उत्तर-पक्ष-ग्रहाः⑥

विश्वकर्मणो ग्रहः⑥

▼ विश्वास-प्रस्तुतिः

इन्द्रो॑ वृ॒त्रँ ह॒त्वाऽसु॑रान् परा॒भाव्य॒ स इ॒माल्ँ लो॒कान् अ॒भ्य॑जयत् ।

▼ भट्टभास्कर-टीका

4 इन्द्रो वृत्रं हत्वेत्यादि ॥ गतम् । पराभाव्य पराभूतान् जितान् कृत्वा ।

▼ विश्वास-प्रस्तुतिः

तस्या॒सौ लो॒को ऽन॑भिजित आसीत् ।
तवँ॒ वि॒श्वक॑र्मा भू॒त्वा ऽभ्य॑जयत् ।

▼ भट्टभास्कर-टीका

असौ लोको द्युलोकः ।

▼ विश्वास-प्रस्तुतिः

यद् वै॑श्वकर्म॒णो गृ॒ह्यते॑ सुव॒र्गस्य॑ लो॒कस्या॒भिजि॑त्यै ।

▼ भट्टभास्कर-टीका

अस्मिन्नह्नि वैश्वकर्मणस्य ग्रहणं स्वर्गस्याभिजित्यै भवति ॥

आदित्य-ग्रहः⑥

▼ विश्वास-प्रस्तुतिः

प्र वा ए॒ते᳚ ऽस्माल् लो॒काच् च्य॑वन्ते॒ ये वै᳚श्वकर्म॒णङ् गृ॒ह्णते᳚ ।
आ॒दि॒त्यश् श्वो गृ॑ह्यते ।

▼ विश्वास-प्रस्तुतिः

इ॒यवँ॑ वा अदि॑तिर् - अ॒स्याम् ए॒व प्रति॑तिष्ठन्ति ।

▼ भट्टभास्कर-टीका

5 प्रवा इत्यादि ॥ अस्माल्लोकात् भूलोकात् । उत्तरेद्युरदितिदेवत्यस्य ग्रहणात् पुनरस्यां प्रतिष्ठा भवति ।

ग्रहणक्रमः⑥

▼ विश्वास-प्रस्तुतिः

अ॒न्यो᳚ऽन्यो *(=पृथक्)* गृह्येते ।
विश्वा॑न्य् ए॒वान्येन॒ कर्मा॑णि कुर्वा॒णा य॑न्ति ।

▼ भट्टभास्कर-टीका

अन्योन्य इत्यादि । अन्यो वा कदाचिद्वैश्वकर्मणादित्यौ पृथक् गृह्येते न सह ।
तत्र अन्येन वैश्वकर्मणेन विश्वानि कर्माणि स्वर्गाद्यभिजयसाधनानि कुर्वाणा यन्ति कर्मसमाप्तिं गच्छन्ति ।

▼ विश्वास-प्रस्तुतिः

(आदित्यग्रहेण) अ॒स्याम् अ॒न्येन॒ प्रति॑-तिष्ठन्ति ।

▼ भट्टभास्कर-टीका

अन्येन आदित्येन अस्यां प्रतितिष्ठन्ति । 'क्रियासमभिहारे सर्वनाम्नो द्वे भवतस्समासवच्च बहुलम्'इति द्विर्वचनं समासश्च । 'अनुदत्तं च'इति द्वितीयं निहन्यते ॥

▼ विश्वास-प्रस्तुतिः

ताव् आऽप॑रा॒र्धात् सँव्॑वत्स॒रस्य *(प्रत्यहं)*
+अ॒न्यो॑न्यो गृह्येते ।
ताव् उ॒भौ स॒ह म॑हा-व्र॒ते गृ॑ह्येते ।

▼ भट्टभास्कर-टीका

6 ताविरयादि ॥ **तौ** वैश्वकर्मणादित्यौ संवत्सरस्य आपरार्धात्
आ अपरपक्षसमाप्तेः प्रत्यहं अन्योन्यः एकैको गृह्यते । अथ महाव्रते उपांत्येऽह्नि तौ सह गृह्येते ।

▼ विश्वास-प्रस्तुतिः

य॒ज्ञस्य+ ए॒वान्त॑ङ् गत्वो॒भयो॑र् लो॒कयो॒ᳵ प्रति॑-तिष्ठन्ति ।

▼ भट्टभास्कर-टीका

अन्तं गत्वेति । समाप्तप्रायत्वात् । उभयोरिति । उत्तरयोर्वैश्वकर्मणादित्ययोः सहग्रहणात् ।

उक्थ्यम्⑥

▼ विश्वास-प्रस्तुतिः

अ॒र्क्य॑म् उ॒क्थम् भ॑वत्य्
अ॒न्नाद्य॒स्याव॑रुध्यै *('अर्को वै देवानाम् अन्नम्' इति हेतुना)*॥ 36॥

▼ भट्टभास्कर-टीका

अर्क्यम् इति शस्त्रविशेषः ।
अन्नाद्यस्येति ।
'अर्को वै देवानाम् अन्नम्' इति तद्धेतुत्वाच्च ॥

इति द्वितीये तृतीयोऽनुवाकः ॥

काठके (नाचिकेताग्नि-ध्यानम्)②

काठके (नाचिकेतानि ध्यानम्) (२ - ७, ८, ९)

▼ विश्वास-प्रस्तुतिः

अ॒यवँ॒ वाव यः पव॑ते *(वायुः)*,
सो॑ऽग्निर्ना॑चिके॒तः ।

स यत् प्राङ् पव॑ते,
तद् अ॑स्य॒ शिरः॑ ।

अथ॒ यद् द॑क्षि॒णा,
स दक्षि॑णः प॒क्षः ।

अथ॒ यत्प्र॒त्यक्, तत्पुच्छ॑म् ।

यद् उदङ्ङ्, स उत्त॑रः प॒क्षः ॥ 37 ॥

▼ भट्टभास्कर-टीका

1 अथ नाचिकेतं ब्राह्मणं त्रयोऽनुवाकाः - अयं वावेत्यादि ॥
वायुत्वेन नाचिकेतस् स्तूयते ।
योऽयं पवते पवमानो वायुर् विश्वस्य पावयिता शोधयिता
स एव नाचिकेतोऽग्निः विश्वस्थितिहेतुत्वात् ।
तस्य **प्राक्**-पवनादीनि शिरः-प्रभृतिस्थानीयानि ।

▼ विश्वास-प्रस्तुतिः

अथ॒ यत् सवँ॒ वाति॑,
तद् अ॑स्य *(कल्पित-शरीरस्य)* स॒मञ्च॑नञ् *(→सङ्कोचः)* च प्र॒सार॑णञ् च ।
अथो॑ स॒म्पद् ए॒वास्य॒ सा ।

▼ भट्टभास्कर-टीका

संवानं संगतं वानं, समं वानं वा दिगन्तरविशिष्टं,
तदस्याग्नेश् शरीरस्य **समञ्चनं** संकोचः **प्रसारणं** विस्तारश्च ।
शरीरगता या चेष्टा अवयव-संकोच-विस्तारात्मिका

तत्स्थानीयं संवानमिति । अपिचास्याग्नि-शरीरस्य **सा संपत्** वृद्धिः जीवनवत्त्वं यदन्तर्वानं, यद्वा - अस्य अग्नेः **सा संपत्** माहात्म्यं यत्पवमानवत् सर्वगामित्वम् ॥

▼ विश्वास-प्रस्तुतिः

सँ ह॒ वा अ॑स्मै॒ सकाम॑ः पद्यते,
यत्का॑मो॒ यज॑ते,
यो॑ऽग्निन्ना॑चिके॒तञ् चि॑नु॒ते,
य उ॑ चैनम् ए॒वव्ँ वेद॑।

▼ भट्टभास्कर-टीका

सँ ह वा इत्यादिर् यष्टुर् विदुषश् च प्रशंसा ॥ यं कामयत इति **यत्कामः** । 'शीलिकामि' इत्यादिना णः, पूर्वपदप्रकृतिस्वरत्वं च ।

▼ विश्वास-प्रस्तुतिः

यो ह॒ वा अ॒ग्नेर् ना॑चिके॒तस्या॒यत॑नं प्रति॒ष्ठाव्ँ वेद॑,
आ॒यत॑नवान्भवति ।
गच्छ॑ति प्रति॒ष्ठाम् ॥ 38 ॥

हिर॑ण्यव्॒ँ वा अ॒ग्नेर् ना॑चिके॒तस्या॒त॑नं प्रति॒ष्ठा ।
य ए॒वव्ँ वेद॑,
आ॒यतन॑वान्भवति ।
गच्छ॑ति प्रति॒ष्ठाम् ।

▼ भट्टभास्कर-टीका

यो ह वा इत्यादि । **आयतनं** स्थानं **प्रतिष्ठा** स्थितिहेतुः।
हिरण्यं तदुभयं, हिरण्येष्टकाभिर् उपधानात् ।
विदित्वा यष्टुः प्रथमं फलं, द्वितीयं वेदितुः ।

▼ विश्वास-प्रस्तुतिः

यो ह॒ वा अ॒ग्नेर् ना॑चिके॒तस्य॒ शरी॑रव्ँ॒ वेद॑,
सश॑रीर ए॒व स्व॒र्गल्ँ लो॒कम् ए॑ति ।
हिर॑ण्यव्॒ँ वा अ॒ग्नेर् ना॑चिके॒तस्य॒ शरी॑रम् ।
य ए॒वव्ँ वेद॑,
सश॑रीर ए॒व स्व॒र्गल्ँ लो॒कमे॑ति ।

▼ भट्टभास्कर-टीका

हिरण्यं नाचिकेतस्य शरीरं हिरण्यात्मकत्वात्तस्य ॥

▼ विश्वास-प्रस्तुतिः

अथो॒ यथा॑ रु॒क्म(=स्वर्णम्) उत्त॑प्तो भा॒य्यात् ॥ 39 ॥,
ए॒वम् ए॒व स तेज॑सा॒ यश॑सा,
अ॒स्मिँश्च॑ लो॒केऽमुष्मिँश्च भाति ।

▼ भट्टभास्कर-टीका

3 अथो यथेति ॥ अपिच उत्तप्तं स्वर्णं यथा भाय्यात् भायात् । छान्दसो द्वितीययकारोपजनः, यकारान्तं वा धात्वन्तरं द्रष्टव्यं, स्वार्थिकण्यन्तो वा भातिर्द्रष्टव्यः । एवमेव स नाचिकेतयाजी तद्वेदी च तेजसा यशसा च अस्मिँश्च लोकेऽमुष्मिँश्च भाति ॥

▼ विश्वास-प्रस्तुतिः

उ॒रवो॑ ह॒ वै नाम॒ैते लो॒काः,
ये ऽव॑रेणादि॒त्यम् ।
अथ॑ ह॒ैते वरी॑याँसो लो॒काः,
ये परे॑णादि॒त्यम् ।

▼ भट्टभास्कर-टीका

4 उरवो ह वा इत्यादि ॥ द्वये लोकाः उरवो महान्तश्च वरीयांस उरुतराश्च । 'प्रियस्थिर' इत्यादिना वरादेशः । तत्रादित्यस्याधस्तादुरव उपरि वरीयांसः ।

▼ विश्वास-प्रस्तुतिः

अन्त॑वन्तँ ह॒ वा ए॒ष क्ष॒य्यल्ँ लो॒कञ्ज॑यति ,
योऽव॑रेणादि॒त्यम् ।
अथ॑ ह॒ैषो॑ऽन॒न्तम॑पा॒रम॑क्ष॒य्यल्ँ लो॒कञ्ज॑यति ,
यः परे॑णादि॒त्यम् ॥ 40 ॥

▼ भट्टभास्कर-टीका

तत्रैष यजमानः कश्चिदन्तवन्तं क्षय्यं क्षपितुं शक्यं लोकं जयति योऽवरेणादित्यं वर्तते, अथ कश्चिद्यजमानः अनन्तं अविनाशं अपारं अपर्यवसानभोगं अक्षय्यं क्षपयितुमशक्यं च लोकं जयति यः परेणादित्यं वर्तते । 'ततोऽन्यत्रापि दृश्यते' इति द्वितीया ।

▼ विश्वास-प्रस्तुतिः

अ॒न॒न्तँ ह॒ वा अंपा॒रमंक्ष॒य्यलँ॒ लो॒कञ्जंयति,
योंऽग्निन्नांचिके॒तञ्चिंनु॒ते,
य उं चैनमे॒ववँ॒ वेदं ।
▼ भट्टभास्कर-टीका

तत्र कोऽनन्तमपारमक्षय्यं लोकं जयतीति चेत्, ब्रूम इत्याह - अनन्तं हेत्यादि । नाचिकेतयाजी नाचिकेतवेदी च तादृशस्य लोकस्य जेतेति वेदितव्यमिति ॥

▼ विश्वास-प्रस्तुतिः

अथो॒ यथा॒ रथे॒ तिष्ठ॒न्
(अधो वर्तमाने) पक्षंसी*(→चक्रे)* पर्या॒वर्तंमाने प्र॒त्यपेंक्षते,
ए॒वम् अंहोरा॒त्रे प्र॒त्यपेंक्षते ।

(आदित्याद् अध एव वर्तमानत्वान्)
नास्यांहोरा॒त्रे लो॒कम् आंप्नुतः,
योंऽग्निन् नांचिके॒तञ् चिंनु॒ते,
य उं चैनमे॒ववँ॒ वेदं ॥ 41 ॥

▼ भट्टभास्कर-टीका

अथो यथेति ॥
अपिच **यथा** रथस्योत्सङ्गे उपरि तिष्ठन्
अधस्तात् **पर्यावर्तमाने पक्षसी** पुनःपुनः परिवर्तमाने चक्रे
प्रत्यपेक्षते तद्विषयिणी अपेक्षा प्रत्यपेक्षणम् ।
एवम् अहोरात्रे आदित्य-वशेनाधस्तात् प्रवर्तमाने अयं प्रत्यपेक्षते,
न ह्यस्य लोकं स्थानं आदित्याद् उपरि स्थितं अहोरात्रे प्राप्नुतः,
तस्मात् कालतो ऽनवच्छिन्नत्वाद् अनन्तत्वम् इति ।
योऽग्निमिति । गतम् ॥

[[152]]

नाचिकेतोपाख्यानम्②

नाचिकेतोपाख्यानम्

▼ विश्वास-प्रस्तुतिः

उ॒शन् ह॒ वै वांजश्रव॒सस् संर्व-वेद॒सन्*(=धनं)* दंदौ ।

▼ भट्टभास्कर-टीका

1 उशन्नित्यादि ॥ उशन्नाम याजश्रवसोऽपत्यं सर्ववेदसं सर्वस्वं ददौ । सर्वं वेदो धनं सर्ववेदसम् । 'अनसन्नन्तान्नपुंसकाच्छन्दसि' इत्यच् समासान्तः ।

▼ विश्वास-प्रस्तुतिः

तस्यं ह नचिंकेता नामं पुत्र आंस ।
तँ हं कुमारँ सन्तं
दक्षिंणासु नीयमांनासु श्रद्धा विंवेश ।

▼ भट्टभास्कर-टीका

तस्य नचिकेता नाम पुत्रो बभूव । छान्दसो भूभावाभावः । न चिकेत न जज्ञौ पितुर्भावमिति नचिकेता इति केचित् । पृषोदरादिः ।
अथ **तं** पुत्रं **कुमारम्** एव बालम् एव **सन्तं**
दक्षिणासु नीयमानासु दक्षिणानयनकाले पितुः **श्रद्धा** दानाभिनिवेशो विवेश प्राप, श्रद्धातिशयेन पुत्रम् अपि दक्षिणात्वेन देयम् अमन्यत ।

▼ विश्वास-प्रस्तुतिः

स होंवाच -
"तत कस्मै मान् दांस्यसी"तिं,
द्वितीयंन्, तृतीयंम् ।

▼ भट्टभास्कर-टीका

अथ विदिताभिप्रायः पुत्र उवाच पितरं - हे तात! कस्मै मां दास्यसि? इति ।
एवं द्वितीयं तृतीयं च पुनःपुनः पप्रच्छ ।

▼ विश्वास-प्रस्तुतिः

तँ ह परींत उवाच -
"मृत्यवें त्वा ददामी"तिं ।

▼ भट्टभास्कर-टीका

अथ एवं पुत्रेण **परीतः** पर्याक्रान्तः पुनःपुनर्निर्बन्धितः पिता क्रुद्ध इव पुत्रमुवाच - मृत्यवे त्वा ददामीति ।

▼ विश्वास-प्रस्तुतिः

तँ ह्र स्मोत्थिंतवँ॒ वाग॒भिवंदति ॥ 42 ॥
"गौतंम! कुमा॒रम्?" इतिं ।
▼ भट्टभास्कर-टीका

अथ पितृवचनानन्तरं मृत्युसकाशं गन्तुम् **उत्थितं** सहसोच्चलितं पुत्रम् अभिलक्ष्याकाशे काचिद् **वाग् अभिवदति स्म** उत्तस्थौ ।
कीदृशी? आह -
हे गौतम! किं **कुमारम्** इति किमेवं बालं मृत्यवे ददासि?
किमिदं गौतमगोत्रस्य तव युज्यते? इति दर्शयितुं गौतमग्रहणम् ।

▼ विश्वास-प्रस्तुतिः

स होंवाच -
परेंहि मृ॒त्योर् गृ॒हान् । *(यतो)* मृ॒त्यवे॒ वै त्वांऽदा॒मितिं ।

▼ भट्टभास्कर-टीका

अथ पितोवाच - परेहि मृत्योर् गृहान्
यथाऽहं पापो न स्यां,
मृत्यवे खलु **त्वाम् अदां** दत्तवान् अहं
नेदानीं दत्तं निवर्तयितुम् उत्सहे
न तद् अन्यथा भाति,
तस्मात् पुत्र परेहि मृत्योर् गहान् यास्यसीति ।

▼ विश्वास-प्रस्तुतिः

"तवँ॒ वै प्र॒वसंन्तङ् ग॒न्ताऽसी"तिं होवाच -

> तस्यं स्म ति॒स्रो रात्री॒रनांश्वान्गृ॒हे वंसतात् ।
> स यदिं त्वा पृच्छेत् -
> "कुमां॒र् कति॒ रात्रीं॒र् अवात्सी॒र्" इतिं,
> "ति॒स्र" इति॒ प्रतिं ब्रूतात् ।
>
> *(स यदिं त्वा पृच्छेत् -)*
> "किं प्रंथ॒माँ रात्रिंम् आश्ना॒" इतिं ॥ 43 ॥
> "प्र॒जां त॒" इतिं *(प्रतिं ब्रूतात्)*।
>
> *(स यदिं त्वा पृच्छेत् -)*
> "किन् द्वि॒तीया॒म्" इतिं ।
> "प॒शूँस् त॒" इतिं *(प्रतिं ब्रूतात्)*।

> *(स यदिं त्वा पृच्छेत् -)*
> किन्तृतीया॒म् इतिं -
> सा॒धु॒कृ॒त्यां त॒ इतिं *(प्रतिं ब्रूतात्)*।

▼ भट्टभास्कर-टीका

अथ पिता पुत्रमुवाच - तं मृत्युं प्रवसन्तं गृहे असंनिहितं गन्तासि, असन्निहिते तस्मिन् मृत्यौ तस्य गृहा गन्तव्यास्त्वयेति यावत् । इत्थं च कर्तव्यमित्याह - तस्य गृहे तिस्रो रात्रीरनाश्वान् अनश्नन्नेव वसतात् वस । अथ स आगतो यदि त्वां पृच्छेत् हे कुमार! कति रात्रीर्मम गृहे अवात्सीः उषितवानसि इति, तिस्रो रात्रीरिति प्रतिब्रूतात् प्रतिब्रूहि । अथ स यदि पुनः पृच्छेत् प्रथमां रात्रिं किमाश्नाः अशितवानसि इति, तदैवं प्रतिब्रूयाः प्रजां आश्नामिति ।

अथ पुनरपि यदि पृच्छेत् द्वितीयां रात्रिं किमाश्ना इति, तदाऽपीत्थं ब्रूयाः पशूंस्ते आश्नामिति ।

यदि भूयोपि पृच्छेत् तृतीयां रात्रिं किमाश्ना इति, तदा चेत्थं प्रतिब्रूहि साधुकृत्यां सुकृतं त्वदीयमाश्नामिति ।

▼ विश्वास-प्रस्तुतिः

तवँ् वै प्र॒वसं॑न्तञ् जगाम ।
तस्यं ह ति॒स्रो रात्री॒रनां॑श्वान्गृ॒ह उं॑वास ।

▼ भट्टभास्कर-टीका

एवं पित्रोक्ते पुत्रोऽपि तथैव कृतवानित्याह - तं वा इत्यादि । गतम् । परोक्षे लिट् ॥

▼ विश्वास-प्रस्तुतिः

तमा॒गत्यं पप्रच्छ ।
कुमां॑र॒ कति॒ रात्रीं॑रवात्सी॒रितिं ।
ति॒स्र इति॒ प्रत्युं॑वाच ॥ 44 ॥

किं प्रं॑थ॒माँ रात्रिं॑माश्ना॒ इतिं ।
प्र॒जान्त॒ इतिं ।

किन्द्वि॒तीया॒मितिं ।
प॒शूँस्त॒ इतिं ।

किन्तृ॒तीया॒मितिं ।
सा॒धु॒कृ॒त्यान्त॒ इतिं ।

▼ विश्वास-प्रस्तुतिः

"नम॑स्ते अस्तु भगव॒" इति॑ होवाच -
"वरव्ँ॑ वृणी॒ष्वे"ति॑ ।
▼ भट्टभास्कर-टीका

2 अथ मृत्युरुवाच - हे भगवः! नमस्ते अस्तु प्रसीदेति । पुनरप्याह स्म - वरं वृणीष्वेति ।

▼ विश्वास-प्रस्तुतिः

पि॒तर॑मे॒व जीव॑न्न् अया॒नीति॑ ।

▼ भट्टभास्कर-टीका

अथ नचिकेता ब्रवीति स्म - पितरमहं जीवन्नेव अयानि गच्छानीति ।

▼ विश्वास-प्रस्तुतिः

द्वि॒तीयव्ँ॑ वृणी॒ष्वेति॑ ॥ 4
"इ॒ष्टा॒पू॒र्तयो॒र्मेऽक्षि॑तिं ब्रू॒ही"ति॑ होवाच ।
तस्मै॑ है॒तम् अ॒ग्निन् ना॑चिके॒तम् उ॑वाच ।
तता॒ वै तस्ये॑ष्टापू॒र्ते नाक्षी॑येते ।

▼ भट्टभास्कर-टीका

अथ तत्तथाऽस्तु, द्वितीयमपि वृणीष्वेति तेनोक्ते
नचिकेता वदति स्म -
इष्टापूर्तयोः **क्षितिं** स्थानं मे ब्रूहीति *(←स्वरकलने देषः)* ।
तत् तस्मै एतं नाचिकेतम् अग्निमुवाच । ततस्तस्येष्टापूर्ते नाक्षीयेताम् । छान्दसं ङेरेत्वम् ।

▼ विश्वास-प्रस्तुतिः

नास्ये॑ष्टापू॒र्ते क्षी॑येते - यो॑ऽग्निन्ना॑चिके॒तञ्चि॑नु॒ते । य उ॑चैनमे॒वव्ँ॑ वेद॑ ।

▼ भट्टभास्कर-टीका

नास्येत्यादि विदुषस्स्तुतिः ।

▼ विश्वास-प्रस्तुतिः

"तृ॒तीयव्ँ॑ वृणी॒ष्वे"ति॑ ।
"पु॒न॒र्मृ॒त्योर्मेऽप॑जितिं ब्रू॒ही"ति॑ होवाच ।
तस्मै॑ है॒तम॒ग्निन्ना॑चिके॒तम् उ॑वाच ।
तता॒ वै सोऽप॑ पुनर्मृ॒त्युम् अ॑जयत् ॥ । 46 ॥

▼ भट्टभास्कर-टीका

ततस्तृतीयं वरं वृणीष्वेति तेनोक्तो नचिकेता ब्रूते स्म - पुनर्मृत्योरपजितिं मे ब्रूहीति । पुनः पुनर्मृतिः पुनर्मृत्युः तस्यापजयोऽमृतत्वम् । तस्मै हेत्यादि । गतम् ॥

▼ विश्वास-प्रस्तुतिः

अप॑ पुनर्मृ॒त्युञ्ज॑यति -
यो॑ऽग्निन् ना॑चिके॒तञ् चि॑नु॒ते,
य उ॑ चैनम् ए॒वव्ँ वेद॑ ।

नाचिकेताग्नि-प्रयोगविधिः②

नाचिकेताग्निप्रयोगः

▼ विश्वास-प्रस्तुतिः

तँ है॒तमेके॑ पशुब॒न्ध ए॒वोत्त॑रवे॒द्याञ् चि॑न्वते -
(सावित्रवद् उत्तर-वेदि-देशे चितत्वात्) "उ॒त्त॒र॒वे॒दि-स॑म्मित ए॒षो॑ ऽग्निर्" इति॒ वद॑न्तः ।

▼ भट्टभास्कर-टीका

1 तँ हैतमित्यादि ॥ **तमेतं** नाचिकेतमग्निं केचित् **पशुबन्ध** एवोत्तरवेद्यां **चिन्वते** ।
उत्तरवेदि-संमित उत्तरवेदि-स्थानीय एषो ऽग्निः
सावित्रवद् उत्तर-वेदि-देशे चितत्वात् । उत्तरवेदिमतां प्रथमः पशुबन्धः, तस्मात्तत्रैव चेतव्यो नान्यत्रेति वदन्तः पशुबन्ध एव चिन्वते ।

▼ विश्वास-प्रस्तुतिः

तन्न तथा॑ कु॒र्यात् ।
ए॒तम् अ॒ग्निङ् *(भूयिष्ठाहुति-)* कामे॑न॒ व्य॑र्द्धयेत् *(=वियोजयेत्)* ।
स ए॑न॒ङ् कामे॑न॒ व्यृ॑द्ध॒ः, *(यजमानम् अपि)* कामे॑न॒ व्य॑र्द्धयेत् ।

▼ भट्टभास्कर-टीका

तत् तथा न कुर्यात्,
तथा ऽकुर्वन्न्
एतम् अग्निं हि **कामेन** भूयिष्ठाहुतिलाभाभिलाषेण **व्यर्धयेत्** वियोजयेत्,
ततोऽसौ **वृद्धिकामो** यजमानम् अपि तदीयेन कामेन व्यर्धयेत् ।

▼ विश्वास-प्रस्तुतिः

सौ॒म्ये वावैनं॑म् अध्व॒रे चिं॑न्वी॒त ।
यत्र॑ वा॒ भूयिं॑ष्ठा॒ आहु॑तयो हू॒येरं॑न् ।

▼ भट्टभास्कर-टीका

तस्मात्सौम्येऽध्वरे चेतव्यः । यत्र वा चातुर्मास्यादौ भूयिष्ठा बहुतरा आहुतयो हूयेरन् तत्र चेतव्यः ।

▼ विश्वास-प्रस्तुतिः

ए॒तम् अ॒ग्निङ् कामे॑न॒ सम॑र्द्धयति ।
स ए॑न॒ङ् कामे॑न॒ समृ॑द्ध॒ः कामे॑न॒ सम॑र्द्धयति ।

▼ भट्टभास्कर-टीका

एतमग्निमित्यादि । गतम् ॥

▼ विश्वास-प्रस्तुतिः

अथ॑ हैनं पु॒रर्षि॑य उत्तरवे॒द्याम् ए॒व स॒त्रिय॑म् *(नाचिकेताग्निम्)* अचिन्वत ।
तत॒ो वै तेऽविं॑न्दन्त प्र॒जाम् ।
अ॒भि स्व॒र्गल्ँ॑ लो॒कम॑जयन् ।

▼ भट्टभास्कर-टीका

2 अथ हैनमित्यादि ॥ सत्रीयं सत्रे भवम् । गतमन्यत् ॥

▼ विश्वास-प्रस्तुतिः

वि॒न्दत॑ ए॒व प्र॒जाम्, अ॒भि स्व॒र्गल्ँ॑ लो॒कञ्ज॑यति,
यो॑ऽग्निन्ना॑चिके॒तञ्चि॑नु॒ते ।
य उ॑ चैनम् ए॒वव्ँ वेद॑ ।

▼ विश्वास-प्रस्तुतिः

अथ॑ हैनव्ँ वा॒युर् ऋद्धिं॑कामो
यथान्यु॒प्तम्*(=यथापातम्)* ए॒वोप॑दधे *(चिताव् इष्टिकाः)* ।
तत॒ो वै स ए॒ताम् ऋद्धि॑माध्नोत्
याम् इ॒दव्ँ वा॒युर् ऋ॒द्धः ।

▼ भट्टभास्कर-टीका

3 अथ हैनमिति ॥
यथान्युप्तं यथा-निपतितेष्टकम्
अञ्जलिना गृहीत्वा वेद्यां चेतिता इष्टका
यथा पतितास् तथैवोपहितवान् ।

ततो वायुर् **एताम् ऋद्धिम् आर्ध्नोत्**। याम् ऋद्धिम् ऋद्धो वायुर् इदानीम् अस्माभिर् गृह्यते ।
इदम् इति क्रिया-विशेषणम् ।
▼ विश्वास-प्रस्तुतिः

ए॒ताम् ऋद्धिं॑म् ऋध्नोति -
याम् इ॒दवँ॒ वा॒युर् ऋ॒द्धः,
योंऽग्निन् नांचिके॒तञ् चिंनु॒ते,
य उं॑चैनम् ए॒ववँ॒ वेदं॑ ।

▼ भट्टभास्कर-टीका

एताम् इत्य्-आदि फल-स्तुतिः ॥

▼ विश्वास-प्रस्तुतिः

अथं॑ हैनङ्गोब॒लो वार्ष्णः॑ प॒शु-कां॑मः ।
पाङ्क्तं॑म् ए॒व चिं॑क्ये -
पञ्चं॑ पु॒रस्तां॑त्,
पञ्चं॑ दक्षिण॒तः,
पञ्चं॑ प॒श्चात्,
पञ् चोंत्तर॒त,
एकां॒ मध्यें॑ ।

▼ भट्टभास्कर-टीका

4 अथ हेति ॥ गोवलो नाम वृष्णेरपत्यं पाङ्क्तं **चिक्ये** चितवान् चतसृषु दिक्षु पक्ष पञ्च, एकां मध्ये । एवं पञ्चत्वान्वयात् पाङ्कत्वम् ।

▼ विश्वास-प्रस्तुतिः

तत॒ो वै स स॒हस्रं॑ प॒शून् प्राप्नोंत् ।
प्र स॒हस्रं॑ प॒शून् आंप्नोति॒,
योंऽग्निन् नांचिके॒तञ् चिंनु॒ते,
य उं॑ चैनम् ए॒ववँ॒ वेदं॑ ।

▼ भट्टभास्कर-टीका

पाङ्क्तस्य चेता वेदिता च सहस्रं पशून् प्राप्नोति ॥
▼ विश्वास-प्रस्तुतिः

अथ॑ हैनं प्र॒जाप॑ति॒र् ज्यैष्ठ्य॑-कामो॒ यश॑स्-कामः प्र॒जन॑न-कामः -
(संख्या-त्रयान्वितं) त्रि॒-वृत॑म् ए॒व चि॑क्ये - स॒प्त पु॒रस्ता॑त् ,
ति॒स्रो द॑क्षिण॒तः ,
स॒प्त प॒श्चात् ,
ति॒स्र उ॑त्तर॒तः ,
एका॒ं मध्ये॑ ।

▼ भट्टभास्कर-टीका

5 अथेति ॥ **ज्यैष्ठ्यं** प्राधान्यं, **यशः** ख्यातिः, **प्रजननं** प्रजासमृद्धिः ।
'शीलिकामि' इति नप्रत्ययः,
पूर्व-पद-प्रकृति-स्वरत्वं च ।
त्रिवृतं संख्या-त्रयान्वितम् ।
पुरस्तात्पश्चाच्च सप्त सप्त,
दक्षिणत उत्तरतश्च तिस्रस्तिस्रः,
एकां मध्य इति ।

▼ विश्वास-प्रस्तुतिः

तत॒ो वै स प्र यश॒ो ज्यैष्ठ्य॑म् आप्नोत् ।
ए॒तां प्रजा॑ति॒ं *(शक्तिं)* प्राजा॑यत *(=प्राजनयत्)*,
याम् *(अवलम्ब्य)* इ॒दं प्र॒जाः प्र॒जाय॑न्ते ।

▼ भट्टभास्कर-टीका

एतां प्रजातिम् इति ।
एतां प्रजातिं प्रजनन-सामर्थ्यं प्राप्नोत्
यां प्रजा इदं प्रजायन्ते ।

▼ विश्वास-प्रस्तुतिः

त्रि॒वृद् वै ज्यैष्ठ्य॑म् -
(यथा लोके-) मा॒ता पि॒ता पु॒त्रः ॥

▼ भट्टभास्कर-टीका

त्रिवृद्धा इत्यादि ।
त्र्यवयवं **ज्यैष्ठ्यं** -
मात्रादयस् त्रयस् संयुक्ताः
प्रशस्यतमा लोके भवन्तीति ।
▼ विश्वास-प्रस्तुतिः

त्रि॒वृत् प्र॒जन॑नम् -
उ॒पस्थो॑ योनि॑र् मध्य॒मा *(→शण्डाः)* ।

▼ भट्टभास्कर-टीका

प्रजननं च त्र्यवयवम् उपस्थादित्रयस्य प्रजनन-हेतुत्वात् । योनिमध्यस्थितं गर्भस्थानं मध्यगा । केचिदाहुः - उपस्थः पुमान्, योनिः स्त्री, मध्यमा गतिः नपुंसकमिति, सर्वप्रजननावृत्त्यभावादसमीचीनम् ।

▼ विश्वास-प्रस्तुतिः

प्र यशो॑ ज्यैष्ठ्य॑म् आप्नोति, ए॒तां प्रजा॑ति॒ं प्रजा॑यते *(=प्रजनयति)* -
याम् *(अवलम्ब्य)* इ॒दं प्र॒जाः प्र॒जाय॑न्ते,
यो॑ऽग्निन् ना॑चिके॒तञ् चि॑नु॒ते,
य उ॑ चैनम् ए॒वव॑ँ वेद॑ ।

▼ भट्टभास्कर-टीका

प्रयश इत्यादि फलस्तुतिः ॥

▼ विश्वास-प्रस्तुतिः

अथ॑ हैन॒म् इन्द्रो॑ ज्यैष्ठ्य॑-कामः -
ऊ॒र्ध्वा ए॒वोप॑दधे ।

▼ भट्टभास्कर-टीका

6 अथ हेति ॥
ऊर्ध्वाः मध्याद् आरभ्य ऊर्ध्व-रीतिकाः
आ स्वयम् आतृण्णायाः प्राचीर् इत्य् अर्थः,
तस्याश् शिरस्-स्थानीयत्वाद् **ऊर्ध्वा** इत्य् उक्तम् ॥

▼ विश्वास-प्रस्तुतिः

ततो॒ वै स ज्यैष्ठ्य॑म् अगच्छत् ॥ ज्यैष्ठ्य॑ङ् गच्छति॒,
यो॑ऽग्निन् ना॑चिके॒तञ् चि॑नु॒ते,
य उ॑ चैनमे॒वव्ँ वेद॑ ।
▼ विश्वास-प्रस्तुतिः

अथ॑ हैनम॒सावा॑दि॒त्यस्स्व॒र्गका॑मः॒ प्राची॑र् ए॒वोप॑दधे ।

▼ भट्टभास्कर-टीका

7 अथ हेति ॥ प्राचीः पश्चिमस्वयम्-आतृण्णाम् आरभ्य आहवनीयाद् उत्सर्पेद् इति केचित् ।

▼ विश्वास-प्रस्तुतिः

ततो॒ वै सो॑ऽभि स्व॒र्गलँ॒ लो॒कम॑जयत् ।
अ॒भि स्व॒र्गलँ॒ लो॒कञ्जय॑ति॒,
यो॑ऽग्निन्ना॑चिके॒तञ्चि॑नु॒ते,
य उ॑ चैनमे॒वव्ँ वेद॑ ।

▼ विश्वास-प्रस्तुतिः

स यदी॒च्छेत् -
"ते॒ज॒स्वी य॑श॒स्वी ब्र॑ह्मवर्च॒सी स्या॒म्" इति॒
प्राङ् आ होतु॒र्धिष्ण्या॒द् उत्स॑र्पे॒त् -
"येयं प्राग॒ाद् यश॑स्वती॒, सा मा॒ प्रोर्णो॑तु॒ तेज॑सा॒ यश॑सा ब्रह्मवर्च॒सेने"ति॑ ।

▼ भट्टभास्कर-टीका

मन्त्रार्थस्तु - **येयं** वेदिः **प्रागात्** प्राची एति गच्छति । छान्दसो लुङ् ।
यशस्वती अन्नवती हविषामाधारत्वात् ।
सा तादृशीं हविर्भिर् आसादितैश् छादिता
माम् अपि तेजःप्रभृतिभिः **प्रोर्णोतु** प्रच्छादयत्विति ॥

▼ विश्वास-प्रस्तुतिः

ते॒ज॒स्व्ये॑व य॑श॒स्वी ब्र॑ह्मवर्च॒सी भ॑वति ।

▼ विश्वास-प्रस्तुतिः

अथ॒ यदी॒च्छेत् -
"भूयि॑ष्ठं मे॒ श्रद्द॑धीरन् । भूयि॑ष्ठा॒ दक्षि॑णा नयेयु॒र्" इति॑ -
दक्षि॑णासु नी॒यमा॑नासु॒

> प्राच्येहि॒ प्राच्ये॒हीति॒ *(प्रेर्यमाणा)*,
> प्राचीं जुषा॒णा,
> वेत्व् आज्यस्य॒ स्वाहा

+इतिं स्रु॒वेणोंप॒हत्याहव॒नीयें जुहुयात् ॥
▼ विश्वास-प्रस्तुतिः

भूयिंष्ठम् ए॒वास्मै॒ श्रद्दंधते॒,
भूयिंष्ठा॒ दक्षिणा नयन्ति ।

▼ विश्वास-प्रस्तुतिः

पुरींषम् उप॒धायं,
('चित्तिमचित्तिम्' इत्य्-आदिभिश्) चितिक्लृ॒प्तिभिंर् अभि॒मृश्यं,
अ॒ग्निं प्र॒णीयोंपसमा॒धाय॒,
चतंस्र ए॒ता आहुंतीर् जुहोति -

"त्वमंग्ने रु॒द्र" इतिं शतरु॒द्रीयंस्य रू॒पम्,
"अग्नाविष्णू॒" इतिं वसो॒र्धारांया॒ *(रूपम्)*,
"अन्नंपत॒" इत्य् अंन्नहोमः,
"स॒प्त तें अग्ने स॒मिधंस्स॒प्त जि॒ह्वा" इतिं विश्व॒प्रीः ॥

▼ भट्टभास्कर-टीका

9 पुरीषमुपधायेत्यादि ॥
चात्वालात् **पुरीषम्** आहृत्य **चिताव्** उपधाय
'चित्तिमचित्तिम्' इत्य्-आदिभिश् **चिति-क्लृप्तिभिर्** अभिमृश्याग्निं **प्रणीयोपसमाधाय**
उपसमिध्य
चतुर्गृहीतेन **चतस्र** आहुतीर् जुहोति
'त्वमग्ने रुद्रः' इत्य्-आदिभिर् एतत्-प्रपाठकाम्नातैश् चतुर्भिर् अनुवाकैः ।
तत्र 'नमस्ते रुद्र' इति शतरुद्रीयस्य रूपं
तत्स्थानीयं "त्वमग्ने रुद्र" इति प्रथमोऽनुवाकः ।
शतं रुद्रा देवता अस्य शतरुद्रीयम् । 'छ च' इति छः ।

वसोर्धाराया रूपं द्वितीयोऽनुवाकः,
तृतीयोऽनुवाको ऽन्नहोमाख्यः अन्नसिद्धि-हेतुः,
चतुर्थोऽनुवाको विश्वप्रीर् नाम विश्वदेवताप्रीतिहेतुत्वात् ।
विश्वान् देवान् प्रीणातीति विश्वप्रीः ॥ इति द्वितीये काठके नवमोऽनुवाकः ॥

[[154]]

[[155]]

त्रिसुपर्णमन्त्राः②

त्रिसुपर्णमन्त्राः

48⑥

▼ विश्वास-प्रस्तुतिः - यजुः

ब्रह्म॑मेतु॒ माम् । मधु॑मेतु॒ माम् । ब्रह्म॑मे॒व मधु॑मेतु॒ माम् ।

▼ विश्वास-प्रस्तुतिः - यजुः

यास्ते॑ सोम प्र॒जाव॒त्सोभि॒ सो अ॒हम् । दुस्व॑प्न॒हन्दु॑रुष्व॒हा ।
यास्ते॑ सोम प्रा॒णाँस्ताञ्जु॑होमि ।

▼ विश्वास-प्रस्तुतिः - यजुः

त्रिसु॑पर्ण॒मया॑चितं ब्राह्म॒णाय॑ दद्यात् ।
ब्र॒ह्म॒ह॒त्यावँ॒ वा ए॒ते घ्न॑न्ति ।

ये ब्रा॑ह्म॒णास्त्रिसु॑पर्ण॒ं पठ॑न्ति ।
ते सोम॒ं प्राप्नु॑वन्ति ।
आ॒स॒ह॒स्रात्प॒ङ्क्तिं पुन॑न्ति । ओम् । (63)

49⑥

▼ विश्वास-प्रस्तुतिः - यजुः

ब्रह्म॑ मे॒धया॑ । मधु॑ मे॒धया॑ । ब्रह्म॑मे॒व मधु॑ मे॒धया॑ ।

अद्या॒॑ नो देव सवितः
प्रजा॑॑वत् **सावीः** सौ॑॑भगम् ।

प॑रा दुष्-ष्व॑प्न्यं **सुव** ॥

▼ अधिमन्त्रम् - sa

- देवता - सविता
- ऋषिः - श्यावाश्व आत्रेयः
- छन्दः - गायत्री

▼ Thomson & Solcum

अद्या॑ नो देव सवितः
प्रजा॑वत् सावीः सउ॑भगम्
प॑रा दुष्व॑प्नियं सुव

▼ Vedaweb annotation

Strata
Archaic

Pāda-label
genre M
genre M
genre M

Morph
adyá ← adyá (invariable)
{}

deva ← devá- (nominal stem)
{case:VOC, gender:M, number:SG}

naḥ ← ahám (pronoun)
{case:ACC, number:PL}

savitar ← savitár- (nominal stem)
{case:VOC, gender:M, number:SG}

prajā́vat ← prajā́vant- (nominal stem)
{case:NOM, gender:N, number:SG}

saúbhagam ← saúbhaga- (nominal stem)
{case:NOM, gender:N, number:SG}

sāvīḥ ← √sū- 1 (root)
{number:SG, person:2, mood:INJ, tense:AOR, voice:ACT}

duṣvápnyam ← duṣvápnya- (nominal stem)
{case:NOM, gender:N, number:SG}

párā ← párā (invariable)
{}

suva ← √sū- 1 (root)
{number:SG, person:2, mood:IMP, tense:PRS, voice:ACT}

▼ पद-पाठः

अ॒द्य । नः॒ । दे॒व॒ । स॒वि॒तः॒रिति॑ । प्र॒जाऽव॑त् । सा॒वीः॒ । सौभ॑गम् ।
परा॑ । दुः॒ऽस्वप्न्य॑म् । सु॒व॒ ॥

▼ Hellwig Grammar

- *adyā ← adya*
- [adverb]
- “now; today; then; nowadays; adya [word].”

- *no ← naḥ ← mad*
- [noun], dative, plural
- “I; mine.”

- *deva*
- [noun], vocative, singular, masculine
- “Deva; Hindu deity; king; deity; Indra; deva [word]; God; Jina; Viśvedevās; mercury; natural phenomenon; gambling.”

- *savitaḥ* ← *savitar* ← *savitṛ*
- [noun], vocative, singular, masculine
- “Savitar; sun; Surya; Savitṛ.”

- *prajāvat*
- [noun], accusative, singular, neuter
- “prolific.”

- *sāvīḥ* ← *sū*
- [verb], singular, Aorist inj. (proh.)
- “give birth; urge; bestow; cause.”

- *saubhagam* ← *saubhaga*
- [noun], accusative, singular, neuter
- “well-being.”

- *parā*
- [adverb]
- “away.”

- *duṣṣvapnyaṃ* ← *duṣṣvapnyam* ← *duḥṣvapnya*
- [noun], accusative, singular, neuter
- “nightmare.”

- *suva* ← *sū*
- [verb], singular, Present imperative
- “give birth; urge; bestow; cause.”

▼ सायण-भाष्यम्

हे **सवितः देव नः** अस्मभ्यम् **अद्य** अस्मिन् यागदिने **प्रजावत्** पुत्राद्युपेतं **सौभगं** धनं **सावीः** प्रेरय । **दुःष्वप्न्यं** दुःस्वप्नं दुःस्वप्नवद्दुःखकरं दारिद्र्यं **परा सुव** दूरे प्रेरय ॥

8अथाष्टमीमाह - हे सवितर्देव! अद्यास्मिन्कर्मणि नोऽस्माकं प्रजावत् पुत्रपौत्राद्युपेतं सौभगं सौभाग्यं सावीः अनुजानीहि । दुष्ष्वप्नियं दुस्स्वप्ननिमित्तं दोषं परासुव विनाश्य ॥

▼ Wilson

English translation:

"Grant us today, divine **Savitā** affluence with progeny, and drive away evil dreams."

Commentary by Sāyaṇa: Ṛgveda-bhāṣya

Para duhṣvapnyam **suva**: duhṣvapnyam = dāridryam, poverty

▼ Jamison Brereton

Today, god Savitar, you have impelled to us a good portion consisting of offspring.
Impel away the bad dream.

▼ Griffith

Send us this day, God Savitar, prosperity with progeny.
Drive thou the evil dream away.

▼ Geldner

Mögest du, Gott Savitri, uns heute kinderreiches Glück zuweisen.
Weise üblen Traum ab!

▼ Grassmann

O schaffe heut, Gott Savitar, uns kinderreichen Segen her; Fort schaffe böses Traumgesicht.

▼ Elizarenkova

Сегодня, о бог Савитар, вызови к жизни
